B.A. Sanskrit
Year – II
Semester – III
Paper - IV

# लघुसिद्धान्तकौमुदी (सन्धिपरिचयः)
# Laghusiddhanta Kaumudi
# (Sandhi Paricaya)


## Centre for Distance and Online Education

श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya**
Deemed to be University u/s 3 of UGC Act 1956 - Accredited with 'A' grade by NAAC
**Enathur, Kanchipuram 631561.**
Sponsored and run by Sri Kanchi Kamakoti Peetam Charitable Trust

**Chief Editor**
Prof. Dr. G. Srinivasu
Vice-Chancellor, SCSVMV

**General Editor**
Dr. B. Balaji Srinivasan
Director, CDOE

**Programme Co-ordinator**
Dr. Debajyoti Jena

**Additional Co-ordinator**
1. Dr. R. Naveen (Academic)
2. Dr. M. Senthil Kumaran (Technical)

**Course Co-ordinator**
Dr. R. Naveen

**Course Writer**
Dr. T.K. Narasimhan
Dr. Shubh Chandra Jha
Dr. Mayank Pandey

**Assistants**
S. Vasudevan
S.V. Kalpavalli

© SCSVMV Deemed University, June 2024
All rights reserved. No part of this work may be reproduced in any form, by mimeograph any other means, without permission in writing from the below mentioned centre
Further information on the SCSVMV ODL Programmes may be obtained from

**Centre for Distance and Online Education (CDOE)**
**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya,**
Enathur,Kanchipuram-631561.
Tamil Nadu, India
Phone: 044 – 2726 4301; Mail Id: onlineprograms@kanchiuniv.ac.in ;

# शुभाभिनन्दनानि

संसकृतवाङ्मयाध्ययननिरतानां समेषां विद्यार्थिनां श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयेन काञ्चीपुरस्थेन सञ्चाल्यमाने दूरविद्याकेन्द्रे भागं ग्रहीतुं सादरं स्वागतम्। विश्वविद्यालयोऽयं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा (NAAC) 'A' श्रेण्यां प्रमाणीकृतः एवं विश्वविद्यालयानुदानायोगेन (UGC) सङ्घटनेन दूरविद्याकेन्द्रत्वेन अनुमतः वर्तते।

विश्वमहाविद्यालयोऽयं १९९३ वर्षे भारतसर्वकारद्वारा प्रकटितः तदारभ्य प्रतिवर्षं विद्याध्यापनक्षेत्रे तथा परिशोधनकार्ये च महतीं समुन्नतिं प्रदर्शयन् वर्धमानः अस्ति। भारतीयपरम्परायां प्राचीनानां ऋषीणां पण्डितानां तथा कवीनां च योगदानं मानवस्य सर्वाङ्गीनविकासाय तथा लोकपरिरक्षणाय च ज्ञानगङ्गां निरन्तरतया प्रवाहयति। नैकानि शास्त्राणि तत्र वर्तन्ते। वेदाः चत्वारः, उपवेदाः, उपनिषदः, षडङ्गाणि, षड्दर्शनानि, अष्टादशपुराणानि, इतिहासौ, धर्मशास्त्रं, काव्यानि, चतुःषष्टिकलाः इत्यादिना ज्ञानपरम्परा अनन्ता सति बहुभ्यः युगेभ्यः लोकस्य मार्गदर्शनं करोति।

प्रकृतेऽस्मिन् काले पाश्चात्यविज्ञानस्य प्रभावेन भारतीय ज्ञानदीपस्य प्रकाशः ह्रासतामेति। आधुनिकविज्ञानद्वारा समाजस्य लाभः विद्यते एव। तथापि अस्मदीयं वाङ्मयं तु न विस्मरणीयं परित्याज्यं च। भारतीयानाम् अनुभवे आचरणे च विद्यामाना योगविद्या प्रपञ्चे सर्वैरपि आद्रियमाना दृश्यते। एवम् आयुर्वेदादयः अपि। अतः अधुनातनविज्ञानेन साकं प्राचीनविज्ञानस्य संयोजनद्वारा प्रपञ्चस्य महानुपयोगः भवति। अनयैव धिया श्रीकाञ्ची कामकोटिपीठाधिपैः प्राचीन-नवीन विद्ययोः संमेलनाय विश्वमहाविद्यालयोऽयं संस्थापितः। तदिदं लक्ष्यम् अग्रे सारयति अध्यापनेन परिशोधनेन च।

श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयः स्वीयेप्राङ्गने बहुविधाः विद्याः बोधयन् दूरस्थानां जिज्ञासूनामपि लाभाय केन्द्रमिदं प्रचालयति। एतत् द्वारा विद्यार्थिनः लाभं लभन्तामिति आशास्महे।

Vice chancellor

Sri Chandrasekharendra Saraswati Viswa Mahavidyalaya

Enathur, Kanchipuram

# लघुसिद्धान्तकौमुदी

**पाठ्यपरिचयः**

संस्कृताध्ययनाय प्रविष्टानां छात्राणां कृते सर्वशास्त्रोपकारकं व्याकरणमत्यन्तमुपयोगि। तस्मादिदं पत्रमत्र निर्धारितं वर्तते। निर्धारिते पत्रे पाठकानां पाणिनीयव्याकरणे प्रवेशाय कश्चन मार्गः अन्विष्टः। तत्र तावत् ग्रन्थपरिचयः, ग्रन्थकर्तुः परिचयः, संज्ञा, सन्धयश्च इत्येते विषयाः प्रतिपाद्यन्ते। यद्यपि एते विषयाः अग्रे प्रौढग्रन्थेष्वपि पाठ्यन्ते तथापि एतान् विषयान् बालानां सुखेन बोधयितुं सरलया पद्धत्या लघुसिद्धान्तकौमुदी वरदराजाचार्येण विरचिता। तस्मात् स एव ग्रन्थः अत्र पाठ्यग्रन्थत्वेन चितः।

**प्रथमः खण्डः**

अस्मिन् भागे विशेषतः ग्रन्थपरिचयः, ग्रन्थकर्तुः परिचयः, गुणसंधिः, वृद्धिसंधिः इत्येते विषयाः निरूपिताः। तदुपकारकतया च काश्चन सञ्ज्ञाश्च निरूपिताः।

**द्वितीयः खण्डः**

अस्मिन् भागे तु विशेषतः प्रकृतिभावसन्धिः निरूप्यते। तत्र तत्र च दलकृत्यमपि निरूपितम्। अस्य खण्डस्य पठनेन प्रकृतिभावसन्धिः तत्प्रसङ्गेन अन्यसन्धयश्च निरूपिताः।

**तृतीयः खण्डः**

अस्मिन् भागे तु विशेषतः हल्सन्धिः निरूप्यते। तत्र तत्र च दलकृत्यमपि निरूपितम्। अस्य खण्डस्य पठनेन हल्सन्धिः तत्प्रसङ्गेन अन्यसन्धयश्च लिखिताः।

**चतुर्थः खण्डः**

अस्मिन् भागे तु विशेषतः विसर्गसन्धिः निरूप्यते। तत्र तत्र च दलकृत्यमपि निरूपितम्। अस्य खण्डस्य पठनेन विसर्गसन्धिः तत्प्रसङ्गेन अन्यसन्धयश्च लिखिताः।

**पञ्चमः खण्डः**

अस्मिन् भागे तु विशेषतः पूर्वरूपसन्धिः पररूपसन्धिश्च निरूप्येते। तत्र तत्र च दलकृत्यमपि निरूपितम्। अस्य खण्डस्य पठनेन पूर्वरूपसन्धिः पररूपसन्धिः तत्प्रसङ्गेन अन्यसन्धयश्च लिखिताः।

| खण्डः | विषयः | पुटसङ्ख्या |
|---|---|---|
| प्रथमः | ग्रन्थपरिचयः, ग्रन्थकर्तुः परिचयः, गुणसंधिः, वृद्धिसंधिः | 7-35 |
| द्वितीयः | प्रकृतिभावसन्धि: | 36-45 |
| तृतीयः | हल्सन्धि: | 46-67 |
| चतुर्थः | विसर्गसन्धि: | 68-77 |
| पञ्चमः | पूर्वरूपसन्धि: पररूपसन्धिश्च | 78-83 |

# प्रथमः खण्डः

**पाठसंरचना-**

१.प्रस्तावना

२.उद्देश्यम्

३.मूलपाठः

४.बोधप्रश्नाः

५.शब्दावाली

६.सारांशः

७.सन्दर्भग्रन्थसूची

८.सहायकग्रन्थसूची

**१. प्रस्तावना-**

अस्मिन् पाठ्यभागे लघुसिद्धान्तकौमुदी निर्धारिता। तत्रापि अस्मिन् भागे विशेषतः ग्रन्थपरिचयः, ग्रन्थकर्तुः परिचयः, गुणसंधिः, वृद्धिसंधिः इत्येते विषयाः निरूपयिष्यन्ते। तदुपकारकतया च काश्चन सञ्ज्ञाश्च निरूपयिष्यन्ते।

**२. उद्देश्यम्-**

१.लघुसिद्धान्तकौमुदीग्रन्थस्य परिचयसम्पादनम्।

२. लघुसिद्धान्तकौमुदीग्रन्थकर्तुः परिचयसम्पादनम्।

३. गुणसन्धेः, वृद्धिसन्धेश्च ज्ञानम्।

**३.मूलपाठः-**

श्रीमता भट्टोदीक्षितेन अष्टाध्याय्याः समग्राणि सूत्राणि स्वीयायां सिद्धान्तकौमुद्यां व्याख्यातानि। तेषां सूत्राणां मध्ये कानिचन सूत्राणि मध्यसिद्धान्तकौमुद्यां व्याख्यातानि वरदराजाचार्येण। तेनैव च मध्यसिद्धान्तकौमुद्यपेक्षया न्युनानि सूत्राणि लघुसिद्धान्तकौमुद्यां व्याख्यातानि । तत्र च अष्टाध्याय्या १२७६ सूत्राणि लिखितानि। बहुषु स्थलेषु वैयाकरणसिद्धान्तकौमुद्याः क्रमोऽपि ग्रन्थकृता नावलम्बितः। ग्रन्थरचनायाः प्रयोजनं मङ्गलश्लोके तेन लिखितः-

**नत्वा सरस्वती देवीं शुद्धां गुण्यां करोम्यहम्।**

**पाणिनीयप्रवेशाय लघुसिद्धान्त-कौमुदीम् ।।**

**ग्रन्थकर्तुः संक्षिप्तः परिचयः**

लघुसिद्धान्तकौमुद्याः कर्ता वरदराजाचार्याः श्रीमतां भट्टोजिदीक्षितानां शिष्याः आसन्। उक्तं च मध्यसिद्धान्तकौमुद्यां तेनैव-

**नत्वा वरदराजः श्रीगुरून् भट्टोजिदीक्षितान् ।**

**करोति पाणिनीयानां मध्यसिद्धान्तकौमुदीम् ।।**

अतस्ते श्रीमतां भट्टोजिदीक्षितानां समकालिकः आसन् इति वक्तुं शक्यते। तस्मात् तेषां जन्म सप्तदशशताब्द्यां जातं इति इतिहासविदः अङ्गीकुर्वन्ति। वरदराजस्य पिता दुर्गातनय आसीत्। सः दाक्षिणभारतस्य आसीत्। सिद्धान्तकौमुदीं संक्षेपयितुं वरदराजैः अयं लघुसिद्धान्तकौमुदीग्रन्थः विरचितः।

**मङ्गलाचरणम्**

**नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम् ।**

**पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम् ॥**

नत्वेति। अञ्जलिशिरःसंयोगादिव्यापारेण तोषयित्वेत्यर्थः। सरस्वतीमिति। सरो विद्यास्थानमस्त्यस्याः इति सरस्वती; ताम् वाग्देवतामित्यर्थः। देवीमिति। दीव्यति प्रलये सर्वान् स्वस्यां निवेश्य क्रीडतीति देवी, ताम्। पचादिषु देवङ्शब्दपाठात् ततो ङीपि रूपम्। शुद्धामिति ।शुद्धस्वरूपाम् दोषरहितामित्यर्थः। गुण्यामिति । प्रशस्ता गुणा यस्याः सा, ताम्। गुणत्रयमध्ये प्रशस्त(सत्त्व)गुणवतीमित्यर्थः। निरुक्तविशेषणद्वयं ग्रन्थपक्षेऽपि योज्यम् । तथा हि, शुद्धाम् — काठिन्यादिदोषरहितामित्यर्थः।गुण्यां शब्दव्युत्पत्तिज्ञानादिप्रशस्तबहुगुणवतीमित्यर्थः।

करोमीति। डुकृञ् करणे अस्मात्कर्तरि लटि रूपम्। उत्पत्त्यनुकूलव्यापारो हि कृधात्वर्थः। पाणिनीयप्रवेशायेति। पाणिनिना प्रोक्तं तेन प्रोक्तम् इत्यर्थे वृद्धाच्छः इति छः, पाणिनीयं महाव्याकरणम् ; तस्मिन् बुद्धेः प्रवेशार्थमित्यर्थः। लघुसिद्धान्तेति। मोदत इति मुदः, कोर्मुदः कुमुदः, कुमुदश्चन्द्रः, तस्येयं तस्येदम् इत्यणि कौमुदी ज्योत्स्ना, लघ्वी चासौ सिद्धान्तकौमुदी चेति तामत्यल्पाम् (संक्षिप्ताम्) अप्यनेकशब्दसिद्धान्तार्थप्रकाशजनिकामिति यावत्॥

**॥ १. अइउण् । २. ऋॢक् । ३. एओङ् । ४. ऐऔच् । ५. हयवरट् । ६. लण् । ७. ञमङणनम् । ८. झभञ् । ९. घढधष् । १०. जबगडदश् । ११. खफछठथचटतव् । १२. कपय् । १३. शषसर् । १४. हल् ॥**

इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि । एषामन्त्याः इतः । हकारादिष्वकार उच्चारणार्थः । लण्मध्ये त्वित्संज्ञकः ॥

संहिताया अविवक्षया नात्र सन्धिकार्यम्। सौत्रत्वान्नैतेभ्यो विभक्त्युत्पत्तिः। कारप्रत्ययोऽपि न, वर्णात्कारः इत्यत्र बहुलमित्यनुवर्तनात्। हयवरडिति। अट्-अश्-हश्-इण्-प्रत्याहारेषु हकारग्रहणार्थोऽत्र हकारोपदेश आवश्यकः। अटि हकारप्रयोजनं तु- अर्हेण इत्यत्र अड्व्यवायेऽपि णत्वार्थम्। अशि हकारप्रयोजनम्-देवा हसन्ति इत्यत्र भो भगो.. इति अश्-निमित्तकं रोर्यत्वार्थम् । हशि

हकारप्रयोजनम्- देवो हसति इत्यत्र हशि च इत्युत्वार्थम्। इणि हकारप्रयोजनम्- लिलिहिध्वे, लिलिहिढ्वे इत्यत्र विभाषेटः इत्यनेन वैकल्पिकढत्वार्थम्।

लणिति। ननु अइउण् इत्यत्र णकारानुबन्धेनैवाणादिप्रत्याहारसिद्धौ पुनरिह णकारानुबन्धग्रहणं व्यर्थमिति चेद्, न। व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् इति परिभाषाज्ञापकत्वेन तस्य साफल्यात्। हलिति। हयवरट् इत्यत्र हकारोपदेशेनैव सिद्धौ पुनरिह हकारोपदशो व्यर्थ इति न च शङ्क्यम्। वल्-रल्-झल्-शल्-प्रत्याहारेषु हकारोपदेशत्वेन तत्र हकारग्रहणस्य सार्थक्यात्। तथाहि-वलि हकारोपदेशप्रयोजनम्- रुदिहि, स्वपिहि अत्र रुदादिभ्यः सार्वधातुके इति वलादिलक्षणेडागमार्थम्। रलि हकारोपदेशप्रयोजनम्-स्निहित्वा, स्नेहित्वा इत्यत्र रलो व्युपधाद्धलादेः संश्च इति कित्त्वार्थम्। झलि- अदाग्धाम् इत्यत्र घस्यासिद्धत्वेन हकारस्य झल्वात् झलो झलि इति सकारलोपार्थम्। शलि अलिक्षत् इत्यत्र शल इगुपधादनिटः क्सः इति च्लेः क्सादेशार्थम्॥

ननु इमानि सूत्राणि मुनित्रयग्रन्थबहिर्भूतत्वादप्रमाणमित्यत आह- इति माहेश्वराणि सूत्राणीति। महेश्वरादागतानि माहेश्वराणि तत आगतः इत्यण्। महेश्वरात्प्राप्तानीति यावत्। ननु महेश्वरप्रणीतसूत्राणामेषां वैयाकरणसिद्धान्तप्रकाशने उपयोगाभावादिह तदुपन्यासो व्यर्थ इत्यत आह — अणादिसंज्ञार्थानीति। अण् आदिर्यासां ताः अणादयः; अणादयश्च ताः संज्ञाश्च अणादिसंज्ञाः, ताः अर्थः प्रयोजनं येषां अणादिसंज्ञार्थानि। एषां सूत्राणाम् अणादिसंज्ञाद्वारा व्याकरणशास्त्रे उपयोगान्नानर्थक्यमिति

भावः। एषामन्त्या इत इति। एषामुदाहृतसूत्राणाम् अन्त्याः — अन्ते भवाः णकारादिवर्णाः इत्संज्ञकाः प्रत्येतव्या इत्यर्थः। हकारादिष्विति। हकारादीनां सुखोच्चारणार्थं पुनःपुनरकारपाठ इत्यर्थः। अन्यथा ह् य् व् र् इत्येवं क्लिष्टोच्चारणापत्तेरिति भावः। लण्मध्ये त्विति। लण्सूत्रघटकोऽकार इत्संज्ञकः, रप्रत्याहारसिद्ध्यर्थमिति भावः। तेन उरण् रपरः इति सूत्रस्थरप्रत्याहारेण रलयोर्ग्रहणमिति यावत्॥

**हलन्त्यम्**

उपदेशेऽन्त्यं हलित्स्यात्। उपदेश आद्योच्चारणम्। सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र॥

उपदेशेऽन्त्यमिति। आद्योच्चारणविषयीभूतो यः शब्दस्तस्यान्त्यं हल् इत्संज्ञकः स्यादिति फलितोऽर्थः। आद्योच्चारणमिति। आद्यानां शिवपाणिनिप्रभृतीनामाद्यमुच्चारणमुपदेशः। यद्वा आद्यञ्च तदुच्चारणञ्चेत्याद्योच्चारणम्, प्रथममुच्चारणमित्यर्थः। शिवपाणिनिप्रभृतीनामाद्यमुच्चारणमुपदेशः। केचित्तु — धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्। आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः — इत्याहुः।

**अदर्शनं लोपः**

प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात्॥

प्रसक्तस्येति। शास्त्रतोऽर्थतश्च प्रसक्तस्य प्राप्तोच्चारणस्येत्यर्थः। दृशेर्ज्ञानसामान्यार्थकत्वात्तस्य च निषेधाऽसम्भवादुच्चारणसत्ताया एव निषेध इति भावः ॥

**तस्य लोपः**

तस्येतो लोपः स्यात्। णादयोऽणाद्यर्थाः॥

णादयोऽणाद्यर्था इति । अण् आदिर्येषां तेऽणादयस्तेऽर्थाः प्रयोजनं येषान्तेऽणाद्यर्थाः । णादयः — ण्-क्-ङ्-च्-प्रभृतयः — इत्संज्ञावर्णाः अणादिप्रत्याहारप्रयोजका इति यावत् ॥

**आदिरन्त्येन सहेता**

अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् । यथाऽणिति अ इ उ वर्णानां संज्ञा। एवमच् हल् अलित्यादयः॥

आदिरन्त्येन सहेतेति । अन्ते भवः अन्त्यः । तेन इता सहोच्चार्यमाणः आदिः अण्-अच्-इत्यादिरूपः संज्ञेत्यर्थः । यस्मात्पूर्वं नास्ति परश्चास्ति स आदिः । यस्मात्परं नास्ति पूर्वश्चास्ति सोऽन्तः । इहाद्यन्ताभ्यामवयवत्वेन बोधकाभ्यां शब्दाभ्यां मध्यगा आक्षिप्यन्ते । अतस्तेषां संज्ञेति लभ्यते । स्वं रूपमिति पूर्वसूत्रादनुवर्तते । तच्च षष्ठ्यन्तया विपरिणम्यते तदेतदाह — अन्त्येनेत्यादि । स्वस्य चेति । अत्र च स्वशब्देन संज्ञाकोटिप्रविष्ट आदिरेव परामृश्यत इति भावः॥

**ऊकालोऽज्झ्रस्वदीर्घप्लुतः**

उश्च ऊश्च ऊ३श्च वः; वां काल इव कालो यस्य सोऽच् क्रमाद् ह्रस्वदीर्घप्लुतसंज्ञः स्यात्। स प्रत्येकमुदात्तादिभेदेन त्रिधा॥

ऊकाल इति। ह्रस्वदीर्घप्लुतः इति समाहारद्वन्द्वः, सौत्रं पुंस्त्वम्। एकद्वित्रिमात्रिकोकाराणामुच्चारणकालसदृशोच्चारणकालविशिष्टोऽच् क्रमशो ह्रस्वदीर्घप्लुतसंज्ञको भवतीति सूत्रार्थः। प्राथम्यादकारोच्चारणमेव युक्तमिति न शङ्क्यम्। कुक्कुटोक्ते उकारे एकद्वित्रिमात्रत्वप्रसिद्धेरकारस्यानुक्तेः। वां काल इति। वः इति ऊशब्दस्य प्रथमाबहुवचनम् । वामिति षष्ठीबहुवचनम्। वां काल इव कालो यस्येति फलितार्थकथनमिति यावत्। एकमात्रात्मक उसदृशोच्चारणकालिको योऽच् स ह्रस्वसंज्ञको भवति। एवं द्विमात्रात्मकोकारोच्चारणकालसदृशः कालो यस्याचः स दीर्घसंज्ञको भवति। एवं त्रिमात्रात्मकोकारोच्चारणकालसदृशो योऽच् सः प्लुतसंज्ञको भवति। स प्रत्येकमिति। सः (लब्धह्रस्वादिसंज्ञकः) ह्रस्वः, दीर्घः, प्लुतश्च अच् प्रत्येकमुदात्तादिभेदेन उदात्तत्वेन, अनुदात्तत्वेन, स्वरितत्वेन च धर्मविशेषेण त्रिधा त्रिभिः प्रकारैर्वर्तत इत्यर्थः॥

**उच्चैरुदात्तः**

उदात्तसंज्ञामाह— उच्चैरुदात्त इति। नादधर्मविशेषः उच्चैस्त्वन्त्विह न विवक्षितम्, उपांशूच्चार्यमाणे अव्याप्तेः। किन्तु उच्चैः शब्दः अधिकरणशक्तिप्रधानः ऊर्ध्वभागे इत्यर्थे वर्तते। ऊकालोऽज्ह्रस्वदीर्घप्लुतः इत्यत अच् इत्यनुवर्तते, तदेतदाह ताल्वादिष्वित्यादिना। सभागेष्विति। ताल्वादीनां सावयवत्वकथनं ऊर्ध्वभागे इत्यस्योपपादनार्थम्।। तेषामखण्डत्वे ऊर्ध्वभागे इत्यनुपपत्तेः।

**नीचैरनुदात्तः**

नीचैश्शब्दः अधिकरणशक्तिप्रधानः, अधोभागे इत्यर्थे वर्तते, तदाह — नीचैरिति ।

**समाहारः स्वरितः**

स नवविधोऽपि प्रत्येकमनुनासिकत्वाननुनासिकत्वाभ्यां द्विधा ॥

समाहारः स्वरितः इति । पूर्वसूत्राभ्यां उदात्तानुदात्तपदे अनुवृत्ते व्याख्यानात् धर्मप्रधाने षष्ठ्यन्ततया च विपरिणम्येते । यस्मिन् समाहरणं स समाहारः । अधिकरणे घञ् । ततश्च उदात्तत्वानुदात्तत्वयोर्धर्मयोर्यस्मिन्नचि मेलनं सोऽच् स्वरितसंज्ञक इत्यर्थः । तदेतत्फलितमाह — उदात्तानुदात्तत्वे इति । स नवविधोऽपीति ।

१. उदात्तह्रस्वः

२. अनुदात्तह्रस्वः

३. स्वरितह्रस्वः

४. उदात्तदीर्घः

५. अनुदात्तदीर्घः

६. स्वरितदीर्घः

७. उदात्तप्लुतः

८. अनुदात्तप्लुतः

९. स्वरितप्लुतः

इति रीत्या य एकैकः अच् नवविधः स्थितः स प्रत्येकमनुनासिकत्वेन अननुनासिकत्वेन च द्विधा द्वाभ्यां प्रकाराभ्यां वर्तत इत्यर्थः ।

**मुखनासिकावचनोऽनुनासिकः**

मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् । तदित्थम् - अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः । ऌवर्णस्य द्वादश तस्य दीर्घाभावात् । एचामपि द्वादश तेषां ह्रस्वाभावात्॥

मुखनासिकेति । मुखद्वितीया नासिका मुखनासिकेति शाकपार्थिवादित्वादुत्तरपदलोपः । उच्यतेऽसौ वचनः 'कर्मणि ल्युट्' । मुखनासिकया वचनः मुखनासिकावचन इति । ननु अष्टादशभेदाः किं सर्वेषामचामविशिष्टाः, नेत्याह — तदित्थमिति । अष्टादशभेदा इति। अष्टादशप्रकारा इत्यर्थः। दीर्घाभावादिति। तथा च उदात्तऌकारदीर्घः, अनुदात्तऌकारदीर्घः, स्वरितऌकारदीर्घः। ते च अनुनासिकास्त्रयः अननुनासिकास्त्रयय इति षड्भेदानामभावे सति ह्रस्वप्रपञ्चः षड्विधः प्लुतप्रपञ्चश्च षड्विध इति ऌकारस्य द्वादशविधित्वमेवेति भावः । ऌकारस्य दीर्घाभावे — होतृ ऌकार इत्यत्र सवर्णदीर्घे कृते होतॄकारः इति ॠकारस्यैव तुल्यास्यप्रयत्नं सवर्णम् सूत्रे अकः सवर्णे दीर्घः इति सूत्रेच भाष्योदाहरणमेव प्रमाणम् । ह्रस्वाभावादिति । यदि एचो ह्रस्वाः स्युः तर्हि वर्णसमान्माये त एव लाघवात् अ इ उ इत्यादिवत्

पठ्येरन् । न तु दीर्घाः गौरवात् । अतः एचो ह्रस्वाः न सन्तीति विज्ञायते । एवञ्च ह्रस्वप्रपञ्चषड्भेदाभावात् द्वादशविधत्वमेवैचाम् इति भावः ।

**तुल्यास्यप्रयत्नं सवर्णम्**

तात्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्। ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यम् । अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्धा। ऌतुलसानां दन्ताः। उपूपध्मानीयानामोष्ठौ। ञमङणनानां नासिका च। एदैतोः कण्ठतालु। ओदौतोः कण्ठोष्ठम्। वकारस्य दन्तोष्ठम्। जिह्वामूलीयस्य जिह्वामूलम्। नासिकाऽनुस्वारस्य। यत्नो द्विधा - आभ्यन्तरो बाह्यश्च। आद्यः पञ्चधा - स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात्। तत्र स्पृष्टं प्रयतनं स्पर्शानाम्। ईषत्स्पृष्टमन्तःस्थानाम्। ईषद्विवृतमूष्मणाम्। विवृतं स्वराणाम्। ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्। प्रक्रियादशायां तु विवृतमेव। बाह्यप्रयत्नस्त्वेकादशधा - विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति। खरो विवाराः श्वासा अघोषाश्च। हशः संवारा नादा घोषाश्च। वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः। वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः। कादयो मावसानाः स्पर्शाः। यणोऽन्तःस्थाः। शल ऊष्माणः। अचः स्वराः। ≍क≍ख इति कखाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीयः। ≍प≍फ इति पफाभ्यां प्रागर्धविसर्गसदृश उपध्मानीयः। अं अः इत्यचः परावनुस्वारविसर्गौ॥

तुल्यास्येति ।आस्ये — मुखे भवम् आस्यं ताल्वादिस्थानम् शरीरावयवाद्यत् इति भवार्थे यत्प्रत्ययः। प्रकृष्टो यत्नः प्रयत्नः। आस्यं च प्रयत्नश्च आस्यप्रयत्नौ। तुल्यौ आस्यप्रयत्नौ यस्य वर्णजालस्य तत् तुल्यास्यप्रयत्नं परस्परं सवर्णसंज्ञकं स्यादिति भावस्तदाह - ताल्वादीति । मिथ इति। परस्परमित्यर्थः। कस्य किं स्थानमित्याकाङ्क्षायां तद्व्यवस्थापकानि पाणिन्यादिशिक्षावचनानि अर्थतः सङ्गृह्णाति - अकुहेत्यादिना। 'अ' इत्यष्टादशभेदा गृह्यन्ते। 'कु' इति कादिपञ्चकात्मकः कवर्गः। अश्च कुश्च हश्च विसर्जनीयश्चेतो विग्रहः । विसर्जनीयशब्दोऽपि विसर्गपर्यायः। इचुयशेति।'इ' इत्यष्टादश भेदाः। 'चु' इति चवर्गः। इश्च चुश्च यश्च शश्चेति विग्रहः। ऋटुरषेति।'ऋ' इत्यष्टादश भेदाः। 'टु' इति टवर्गः। आ च टुश्च रश्च षश्चेति विग्रहः। 'ऋ' शब्दस्य आ इति प्रथमैकवचनान्तम्, 'धाता' इतिवत्। ऌतुलसेति। 'ऌ' इत्यस्य द्वादश भेदाः। 'तु' इति तवर्गः। आ च तुश्च लश्च सश्चेतिविग्रहः। 'ऌ' शब्दस्यापि 'आ' इत्येव प्रथमैकवचनान्तत्वम् — आ, अलौ, अलः इति । दन्तशब्देन दन्तमूलप्रदेशो विवक्षितः। अन्यथा भग्नदन्तस्य तदुच्चारणानुपपत्तेः । उपूपेति। 'उ' इत्यष्टादशभेदाः। 'पु' इति पवर्गः। उश्च पुश्च उपध्मानीयश्चेति विग्रहः। उपध्मानीयशब्दस्य व्याख्यानमनुपदमेव मूले स्पष्टं भविष्यति। ञमङणनेति। ञश्च मश्च ङश्च णश्च नश्चेति विग्रहः। चकारेण स्वस्ववर्गीयस्थानसमुच्चयः। एदैतोरिति। एच्च ऐच्च एदैतौ। तपरकरणमसन्देहार्थम्। ओदौतोरिति। ओच्च औच्च औदौतो। तपरकरणं पूर्ववदसन्देहार्थमेव। जिह्वामूलीयस्येति। ≍क ≍ख इति कखाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीय इति अग्रे मूले एव उक्तम्। अनुस्वारस्येति। स्थानमिति शेषः। अनुस्वारस्य

नासिकास्थानमस्तीति भावः। यत्नो द्विधेति। यत्नानामाभ्यन्तरत्वं बाह्यत्वं च वर्णोत्पत्तेः प्रागूर्द्धभावित्वमिति पाणिन्यादिशिक्षासु स्पष्टम्। यत्न इति। यत्नशब्दोऽत्र प्रयत्नपरः । आद्य इति आभ्यन्तप्रयत्नः इत्यर्थः। कथं पञ्चधा इत्यत आह- स्पृष्टेत्यादिना। तत्रेति। स्पृष्ट,ईषत्स्पृष्ट,ईषद्विवृत,विवृत,संवृत- एषु मध्ये इत्यर्थः। प्रयतनमिति। प्रयत्न इत्यर्थः। स्पर्शानामिति । स्पर्शवर्णानामित्यर्थः । के ते वर्णाः इति मूले स्फुटीभविष्यन्ति। तथापि निर्दिश्यन्ते अत्रापि - क, ख, ग, घ, ङ, च, छ, ज, झ, ञ, ट, ठ, ड, ढ, ण,त,थ,द,ध,न,प,फ,ब,भ,मकवर्णादारभ्यमवर्णपर्यन्तम्। अन्तःस्थानामिति। यरलवानामित्यर्थः।

ऊष्मणामिति। श,ष स ह इत्येतेषामित्यर्थः। स्वराणामिति। अ इ उ ऋ ऌ ए ओ ऐ औ इत्येतेषामित्यर्थः । प्रयोगे इति। शास्त्रीयप्रक्रियाभिः परिनिष्ठितायां रामः कृष्णः इत्यादिशब्दानां प्रयोगे क्रियमाणे एव ह्रस्वस्यावर्णस्य संवृतत्वमित्यर्थः। प्रक्रियेति। शास्त्रीयकार्यप्रवृत्तिसमये दण्ड-आढक इत्यादौ सवर्णदीर्घादिकर्तव्ये तु विवृतत्वमेव। तेन सन्धिकार्यं निर्बाधमेव। एतत्सर्वं पूर्वत्रासिद्धम् इत्यनेन ज्ञापितमिति सिद्धान्तकौमुद्यां स्पष्टम्। बाह्येति। वर्णोत्पत्यनन्तरजातो यत्नो बाह्यप्रयत्न इत्युच्यते। खर इति। ख फ छ ठ थ च ट त क प श ष स — इति वर्णाः। विवारा इति। विवारादिप्रयत्नवन्तः इत्यर्थः। हश इति । ह य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड च — इति वर्णा इत्यर्थः। संवारा इति। संवारादिप्रयत्नवन्तः इत्यर्थः। अल्पप्राणा इति। कगङ, चजञ, टडण, तदन पबम, यरलव — इत्येतेषां वर्णानाम् अल्पप्राणः इति भावः। खघ, छझ, ठढ, थध, फभ, शषसह — इत्येतेषां महाप्राणः इत्यपि ज्ञेयम्। कादय इति। क-ख-

इत्यादि-म-पर्यन्तमिति पूर्वमुक्ताः वर्णाः इत्यर्थः। क आदिर्येषां ते कादयः, म अवसाने येषान्ते मावसाना इति। यण इति। यण्-प्रत्याहारान्तर्गतवर्णाः, 'यरलवाः' इत्यर्थः। शल इति । शल्-प्रत्याहारान्तर्गतवर्णाः 'श,ष,स,ह' — इत्येते। स्वरा इति। स्वेन राजत इति स्वराः, 'अ इ उ ऋ ऌ ए ओ ऐ औ' — इति वर्णाः इत्यर्थः ॥

**अणुदित् सवर्णस्य चाप्रत्ययः**

प्रतीयते विधीयत इति प्रत्ययः। अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात्। अत्रैवाण् परेण णकारेण। कु चु टु तु पु एते उदितः। तदेवम् - अ इत्यष्टादशानां संज्ञा। तथेकारोकारौ। ऋकारस्त्रिंशतः। एवम् ऌकारोऽपि। एचो द्वादशानाम्। अनुनासिकाननुनासिकभेदेन यवला द्विधा; तेनाननुनासिकास्ते द्वयोर्द्वयोस्संज्ञा॥

अणुदिदिति । अण् अविधीयमानः सवर्णबोधकः, उदित् विधीयमानोऽपि सवर्णबोधको भवतीत्यर्थः । तेन ऋत उत् इत्यादौ विधीयमाने उति इति न सवर्णग्रहणम् । कुहोश्चुः , चोः कुः इत्यादौ विधीयमानेऽपि सवर्णग्रहणमिति भावः । अत्रैवेति । अस्मिन्नेव सूत्रे इत्यर्थः । अन्यत्र तु अणोप्रगृह्यस्यानुनासिकः इत्यादौ । पूर्वणकारेण सह प्रत्याहारः । अत्र व्याख्यानमेव शरणम् । 'पूर्वेणैवाण् ग्रहाः सर्वे परेणैवेण्ग्रहा मताः । ऋतेऽणुदित्सवर्णस्येत्येतदेकं परेण तु ॥' — इति भाष्यकारेणोक्तम् ॥ तदेवमिति । तत् अणुदित्सवर्णस्य चाप्रत्ययः सूत्रम्, एवं वक्ष्यमाणप्रकारेण फलतीत्यर्थः । अष्टादशानामिति ।

(१) ह्रस्वोदात्तानुनासिकः

(२) ह्रस्वोदत्ताननुनासिकः

(३) ह्रस्वानुदात्तानुनासिकः

(४) ह्रस्वानुदात्ताननुनासिकः

(५) ह्रस्वस्वरितानुनासिकः

(६) ह्रस्वस्वरिताननुनासिकः

(७) दीर्घोदात्तानुनासिकः

(८) दीर्घोदत्ताननुनासिकः

(९) दीर्घानुदात्तानुनासिकः

(१०) दीर्घानुदात्ताननुनासिकः

(११) दीर्घस्वरितानुनासिकः

(१२) दीर्घस्वरिताननुनासिकः

(१३) प्लुतोदात्तानुनासिकः

(१४) प्लुतोदत्ताननुनासिकः

(१५) प्लुतानुदात्तानुनासिकः

(१६) प्लुतानुदात्ताननुनासिकः

(१७) प्लुतस्वरितानुनासिकः

(१८) प्लुतस्वरिताननुनासिकः — इत्येतेषामित्यर्थः ।

तथेति । अनया रीत्या इकार-उकारयोरपि बोध्यम् । ऋकार इति । अनेन प्रकारेण । ऋकारस्य अष्टादश । ऌकारस्य दीर्घाभावात्, ऌकारदीर्घषट्कं विहाय द्वादश । ऋकार-ऌकारयोः सावर्ण्यात् मिलित्वा त्रिंशत् — इति भावः । एवमिति । पूर्वोक्तप्रकारेणैव । एच इति । द्वादशानां बोधकाः । तदेवम् - ए, ओ, ऐ, औ इति प्रत्येकं द्वादश इति भावः । ननु स्थानप्रयत्नयोस्तुल्यत्वात् सावर्ण्येन ए ऐकारस्य, ओ औकारस्य बोधकस्तेन चतुर्विंशतेः संज्ञकः एकारः, एवमोकारः स्यादिति चेद्, न। 'ऐऔच्' इति पृथक् सूत्रत्वेन तयोः सावर्ण्याभावज्ञापकत्वात् । तेन इति। यवलानां प्रकारद्वयेन ॥

**परः सन्निकर्षः संहिता**

वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् ॥

परः सन्निकर्ष इति। परः अतिशयितः, सन्निकर्षः सामीप्यम्, अर्धमात्राधिककालव्यवधानाभावः। अर्धमात्राकालव्यवधानस्य अवर्जनीयत्वात्। तदेतदभिप्रत्याह— अतिशयितइत्यादिना। संहितेति। स्वभावसिद्धार्धमात्रातिरिक्तकालव्यवायशून्यः संहिता इति भावः ।

**हलोऽनन्तराः संयोगः**

अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः॥

संयोग इति । स्वरसंज्ञकवर्णैर्व्यवधानशून्या हल्वर्णाः संयोगसंज्ञकाः इत्यर्थः ।

**सुप्तिङन्तं पदम्**

सुबन्तं तिङन्तं च पदसंज्ञं स्यात् ॥

सुप्तिङिति। स्वौजसमौट्... इति सूत्रे 'सु'-इत्यारभ्य सुपः पकारेण प्रत्याहारः। न तु सप्तमीबहुवचनस्यैवात्र ग्रहणम्, व्याख्यानात् । तिप्तस्झि... सूत्रे 'ति'-इत्यारभ्य महिङो ङकारेण प्रत्याहारः। सुप् च तिङ् च सुप्तिङौ, तावन्ते यस्य तत् सुप्तिङन्तं शब्दस्वरूपम् इति शब्दशास्त्रप्रस्तावाल्लभ्यते । अन्तशब्दश्च प्रत्येकं सम्बध्यते तदेतदभिप्रेत्याह — सुबन्तेत्यादिना।

**इको यणचि**

इकः स्थाने यण् स्यादचि संहितायां विषये। सुधी उपास्य इति स्थिते॥

इकः स्थान इति। इकः इति षष्ठी। षष्ठी स्थानेयोगा इति सूत्रेण स्थान इति लभ्यते। स्थानञ्च प्रसङ्गः। तथाहि — इकामुच्चारणप्रसङ्गे यणामुच्चारणं कर्तव्यमित्यर्थः। सुधी इति। ध्यै चिन्तायामिति धातोः ध्यायतेः सम्प्रसारणञ्च (वार्त्तिकम्) इति क्विपि यकारस्य सम्प्रसारणे इकारे पूर्वरूपे हलः च इति दीर्घे धीशब्दो निष्पन्नः। शोभना धीः येषान्ते सुधयः। सुधीभिः उपास्यः सुध्युपास्यः।

**तस्मिन्निति निर्दिष्टे पूर्वस्य**

सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम्॥

**स्थानेऽन्तरतमः**

प्रसङ्गे सति सदृशतम आदेशः स्यात्। सुध्य् उपास्य इति जाते ॥

**अनचि च**

अचः परस्य यरो द्वे वा स्तो न त्वचि। इति धकारस्य द्वित्वेन सुध्ध्य् उपास्य इति जाते॥

**झलां जश् झशि**

स्पष्टम्। इति पूर्वधकारस्य दकारः॥

**संयोगान्तस्य लोपः**

संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्॥

**अलोऽन्त्यस्य**

षष्ठीनिर्दिष्टस्यान्त्यस्याल आदेशः स्यात्। इति यलोपे प्राप्ते - यणः प्रतिषेधो वाच्यः (वार्त्तिकम्)। सुद्ध्युपास्यः। मद्ध्वरिः। धात्त्रंशः। लाकृतिः॥

अत्र सुधी-उपास्यः इति स्थिते इको यणचि इति सूत्रेण अजव्यवहितपूर्व-इक् — धकारोत्तवर्ति ई, तस्य स्थाने स्थानेऽन्तरतमः इति सूत्रेण 'य्', न तु 'वरलाः', आन्तरतम्याभावात्। सुधय्-उपास्यः इति

जाते अनचि च इति सूत्रेण धकारस्य द्वित्वे झलां जश् झशि इति सूत्रेण प्रथमधकारस्य दकारे सुद्ध्-उपास्यः इत्यवस्थायां संयोगान्तस्य लोपः इति सूत्रेण यकारस्य लोपे प्राप्ते, यणः प्रतिषेधो वाच्यः इति वार्त्तिकेन यलोपनिषेधे सति सुध्युपास्यः इति रूपं सिद्धम् । मध्वरिः इति । मधोः अरिः मध्वरिः । मधुनामदैत्यस्य अरिः शत्रुः श्रीकृष्ण इत्यर्थः॥ अत्र साध्यते — मधु-अरिः इति स्थिते इको यणचि इति सूत्रेण अजव्यवहितपूर्वत्वविशिष्ट-इक् धकारोत्तवर्ति उ, तस्य स्थाने स्थानेऽन्तरतमः इति परिभाषया (वकारस्य दन्तोष्ठम्, उपूपध्मानीयामनामोष्ठौ इति उभयोः उकारवकारयोः स्थानसाम्यात्) 'व्' जाते मध्व्-अरिः इत्यवस्थायाम् अनचि च इत्येनन द्वित्वे झलां जश् झशि इत्यनेन धकारस्य दकारे, संयोगान्तस्य लोपः इति सूत्रेण लोपे प्राप्ते, यणः प्रतिषेधो वाच्यः इत्यनेन निषिद्धे सति मध्वरिः इति सिद्धम् । धात्त्रंशः इति । धातुः अंशः धात्रंशः। धातृ-अंशः इति स्थिते इको यणचि इत्यनेन ऋ-स्थाने स्थानेऽन्तरतमपरिभाषया र् कृतः । अत्रापि संयोगान्तस्य लोपः इति लोपे प्राप्ते, यणः प्रतिषेधो वाच्यः इत्यनेन निषिद्धे, धात्रंशः इति सिद्धम्भवति। लाकृतिरिति। लुरिव आकृतिः यस्यः सः इति विग्रहः इति भावः । ऌ-आकृतिः इत्यत्र इको यणचि इत्यनेन स्थानत आन्तर्यात् 'ऌ' इत्यस्य स्थाने 'ल्' इति, अत्रापि लोपे प्राप्ते निषिद्धे सति, अज्झीनं परेण संयोज्यम्, लाकृतिः इति रूपं सिद्धम् ॥

**एचोऽयवायावः**

एचः क्रमादय् अव् आय् आव् एते स्युरचि॥

**यथासंख्यमनुदेशः समानाम्**

समसंबन्धी विधिर्यथासंख्यं स्यात्। हरये। विष्णवे। नायकः। पावकः॥

समसम्बन्धीति। समानामिति यदि 'कर्मणि षष्ठी', तर्हि स्थान्यादिभिः समसंख्यानां यत्र विधानं तत्रैव यथासंख्यमित्यस्य प्रवृत्तिः, यथा, एचोऽयवायावः इत्यत्र, न तु समूलाकृतजीवेषु हन्कृञ्ग्रहः इत्यत्र। तत्र विधेयस्य णमुल्-इत्यस्य एकत्वात्। अतः समानामिति 'सम्बन्धे षष्ठी' इति भावः। हरये इति। हरे-ए इति स्थिते, एचोऽयवायावः इत्यनेन एच्-प्रत्याहारघटकः 'हरे' इत्यत्र रेफोत्तरवर्ती एकारः, तस्य स्थाने 'अय' आदेशो जातः, अच्-प्रत्याहारघटक एकारे परे। तेन हरय्-ए इति जाते, अज्झीनं परेण संयोज्यम्, हरये इति सिद्धम्। विष्णवे इति । विष्णो-ए इति स्थिते एचोऽयवायावः इत्यनेन अचि एकारे परे विष्णो अत्रस्थो य ओकारः, तस्य स्थाने अव्-आदेशः कृतः। विष्णव्-ए इति जाते मिलित्वा विष्णवे इति रूपं सिद्धम्। नायक इति। नै-अक: अत्र आय्-आदेशः, पौ-अकः अत्र आव्-आदेशः एचोऽयवायावः इत्यनेन इति भावः ॥

**वान्तो यि प्रत्यये**

यकारादौ प्रत्यये परे ओदौतोः अव् आव् एतौ स्तः। गव्यम्। नाव्यम्। अध्वपरिमाणे च (वार्त्तिकम्) गव्यूतिः॥

यकारादाविति। यस्मिन्विधिस्तदादावल्ग्रहणे इति परिभाषया तदादिलाभेन यकारादौ इत्यर्थस्य लाभः इति भावः। गव्यमिति। गोशब्दात् गोपयसोर्यत् इत्यनेन विकारार्थे यति प्रत्यये रूपम्। अत्र गो-

यम् इति स्थितौ ओकारस्य अच्-परकत्वाभावात् एचोऽयवायावः इत्यनेन आवादेशाप्राप्तौ, वान्तो यि प्रत्यये इत्यनेन यादिप्रत्ययः 'य' इति, तस्मिन् परे 'अव्' आदेशे कृते गव्यम् इति रूपं सिद्धम्। नाव्यमिति। नौ-यम् इति स्थिते वान्तो यि प्रत्यये इत्यनेन यकारादौ प्रत्यये परे आव्-आदेशे कृते नाव्यम् इति भवति। नावा तार्यं नाव्यमित्यर्थः॥ अध्वपरिमाणे चेति। मार्गपरिमाणे अर्थे गम्यमाने ओकारस्य स्थाने 'अव्' आदेशो भवति 'यूति' शब्दे परे। यथा — गो-युतिः इत्यत्र अध्वपरिमाणे च इत्यनेन अवादेशे, गव्यूतिः इति रूपं सिद्धम्। 'गव्यूतिः स्त्री क्रोशयुगम्' इत्यमरः। क्रोशयुगस्य संज्ञैषेति भावः॥

**अदेङ् गुणः**

अत् एङ् च गुणसंज्ञः स्यात्॥

**तपरस्तत्कालस्य**

तः परो यस्मात्स च तात्परश्चोच्चार्यमाणसमकालस्यैव संज्ञा स्यात्॥

तः परः इति तपरपदे बहुव्रीहितत्पुरुषसमासद्वयं व्याख्यानादतो वृत्तावाह — तः परो यस्मात्तात्परश्चेति ॥

**आद्गुणः**

अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्। उपेन्द्रः। गङ्गोदकम्॥

आद्गुण इति । इको यणचि  इत्यतो अचि इति, एकः पूर्वपरयोः  इति सम्पूर्णं सूत्रमनुवर्तते अत आह — अचि परे पूर्वपरयोरिति। उपेन्द्र इति उप-इन्द्र इति स्थिते अत्र आद्गुणः  इति सूत्रेण पूर्वपरयोः अकार-इकारयोः स्थाने गुणसंज्ञकः कण्ठतालुस्थानकः एकारो जातः। तेन उपेन्द्र इति रूपं सिद्धम्। गङ्गोदकमिति। गङ्गा-उदकम् इति  स्थिते आद्गुणः  इत्यनेन सूत्रेण पूर्वपरयोः आकार-उकारयोः स्थाने ओकारे कृते गङ्गोदकमिति सिद्धम् ॥

**उपदेशेऽजनुनासिक इत्**

उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात्। प्रतिज्ञानुनासिक्याः पाणिनीयाः। लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा॥

प्रतिज्ञेति । प्रतिज्ञायते इति प्रतिज्ञा । अनुनासिकस्य भावः आनुनासिक्यम् । प्रतिज्ञा आनुनासिक्यं येषान्ते प्रतिज्ञानुनासिक्याः । लण्सूत्रस्थेति । 'लण्'-सूत्रे तिष्ठतीति लण्सूत्रस्थः स चासौ अवर्णश्च लण्सूत्रस्थावर्णः, तत्र सहोच्चार्यमाणो रेफः 'र' इत्येवं रूपः रेफलकारयोस्संज्ञेत्यर्थः॥

**उरण् रपरः**

ऋ इति त्रिंशतः संज्ञेत्युक्तम्। तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते। कृष्णर्द्धिः। तवल्कारः॥

उरणिति। उः इति 'ऋ' इत्यस्य षष्ठ्येकवचनम् । त्रिंशतः इति। अणुदित्सवर्णस्य चाप्रत्यय इत्यनेनेति भावः। तत्स्थाने इति । स्थानेऽन्तरतमः इत्यतः स्थानग्रहणमनुवर्तते। विधौ

परिभाषोपतिष्ठते नानुवादे इति परिभाषया उरण् रपरः  इत्यत्र षष्ठी स्थानेयोगा  इति परिभाषा नोपतिष्ठते इति भावः। रपरः सन्नेवेति। अत्र 'र' इति प्रत्याहारो ग्राह्यः। तेन रेफशिरस्कः लकारशिरस्कः च प्रवर्तते। कृष्णर्द्धिरिति। कृष्ण-ऋद्धिः इति स्थिते अत्र आद्गुणः इति सूत्रेण कृष्ण इत्यस्य णकारोत्तवर्तिः अकारः तस्मात् अचि परे (नाम ऋकारे परे) पूर्वपरयोः (अकार-ऋकारयोः) स्थाने गुणे प्राप्ते, गुणकसंज्ञकाश्च अदेङ्गुणः इति सूत्रेण अ, ए, ओ इति, एषां त्रयाणां मध्ये कः कर्तव्यः ? एकारस्य तु कण्ठतालुस्थानम्, ओकारस्य कण्ठोष्ठस्थानम् एतौ ए ओ इति न भवतः, आन्तरतम्याभावात्, किन्तु परिशेषात् अ एव भवति, स च उरण् रपरः  इति सूत्रेण रपरः (रेफशिरस्कः) सन् भवति। तेन कृष्णर्द्धिः इति रूपम्। तवल्कार इति। तव-ऌकारः इति स्थिते अत्र आद्गुण इति सूत्रेण अत्र वकारोत्तवर्तिः अकारः तस्य ऌकारस्य च उभयोः स्थाने अ-रूपगुणे उरण् रपर इति सूत्रेण लपरे च कृते तवल्कारः इति रूपम्भवति ॥

**वृद्धिरादैच्**

आदैच्च वृद्धिसंज्ञः स्यात्॥

**वृद्धिरेचि**

आदेचि परे वृद्धिरेकादेशः स्यात्। गुणापवादः। कृष्णैकत्वम्। गङ्गौघः। देवैश्वर्यम्। कृष्णौत्कण्ठ्यम्॥

कृष्णैकत्वमिति। कृष्ण-एकत्वम् इति स्थिते अत्र वृद्धिरेचि इत्यनेन अवर्णात् (कृष्णघटकणकारोत्तवर्ति-अवर्णात्) एचि (एच्-प्रत्याहारघटक-एकारे, एकत्वम् इति रूपस्थाद्यैकारे) परे पूर्वपरयोः (अ-ए इत्यत्र) वृद्धिसंज्ञकः (वृद्धिरादैच् इति सूत्रेण वृद्धिसंज्ञकेषु 'आ ऐ औ' इत्येतेषु स्थानेऽन्तरतमः इत्यनेन कण्ठस्थानिकाकारस्य कण्ठतालुस्थानीयैकारस्य च स्थाने कण्ठतालुसंज्ञकः आन्तरतम्यः) ऐ आदेशो जातः, तेन कृष्णैकत्वम् इति सिद्धम्। अनेनैव प्रकारेण गङ्गौघः, देवैश्वर्यम्, कृष्णौत्कण्ठ्यम् इति बोध्यम्। संक्षेपस्तु गङ्गा-ओघः इति स्थिते अत्र वृद्धिरादैच् इति सूत्रेण पूर्वपरयोः आकारस्य ओकारस्य च स्थाने वृद्धिसंज्ञकः आन्तरतम्यः औ-आदेश। तेन गङ्गौघः इति जायते । देव-ऐश्वर्यम् इत्यत्र पूर्वपरयोः स्थाने ऐ-आदेशे देवैश्वर्यम् इति। कृष्ण-औत्कण्ठ्यम् इति स्थिते तत्र पूर्वपरयोः स्थाने औ-आदेशे कृते कृष्णौत्कण्ठ्यम् इति सिद्धम्भवति।

**एत्येधत्यूठ्सु**

अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्। उपैति। उपैधते। प्रष्ठौहः। एजाद्योः किम्? उपेतः। मा भवान्प्रेदिधत्। अक्षादूहिन्यामुपसंख्यानम् (वार्त्तिकम्) । अक्षौहिणी सेना। प्रादूहोढोढ्येषैष्येषु (वार्त्तिकम्)। प्रौहः। प्रौढः। प्रौढिः। प्रैषः। प्रैष्यः। ऋते च तृतीयासमासे (वार्त्तिकम्)। सुखेन ऋतः सुखार्तः। तृतीयेति किम्? परमर्तः। प्रवत्सतरकम्बलवसनार्णदशानामृणे (वार्त्तिकम्) । प्रार्णम्, वत्सतरार्णम्, इत्यादि॥

उपैतीति । उप-एति इति स्थिते अत्र एत्येधत्यूठ्सु इत्यनेन अवर्णादेकादि इण्-धातु-एध्-धातु-ऊठ्सु परेषु पूर्वपरयोः स्थाने वृद्धिरूपैकादेशो भवतीत्यर्थकेन, अवर्णात् (उप इत्यत्र पकारोत्तवर्ति-अवर्णात्) एजादि-(इण्-धातु-)एति-परे पूर्वपरयोः (अ-ए-इत्यत्र) वृद्धिसंज्ञक आन्तरतम्य ऐ आदेशो जातः, तेन उपैति इति भवति। अत्र एङि पररूपम् इत्यनेन पररूपस्य प्राप्तिरासीत्, परं तत्सूत्रमपवादत्वात् एत्येधत्यूठ्सु इत्यनेन वृद्धौ सत्याम् उपैधते इति रूपम् । प्रष्ठ-उहः इति स्थिते अत्र आद्गुणः इत्यनेन गुणे प्राप्ते एत्येधत्यूठ्सु इत्यनेन प्रबाध्य वृद्धौ सत्यां रूपम्। उप-इतः, मा भवात् प्र-इदिधत् इत्यत्र एजादिपरत्वाभावान्न वृद्धिः, किन्तु आद्गुणः इत्यनेन गुणे रूपम् — उपेतः इति, प्रेदिधत् इति च । अक्षौहिणीति अत्र अक्ष-ऊहिनी इति दशायाम् आद्गुणः इत्यनेन गुणे प्राप्ते अक्षादूहिन्यामुपसङ्ख्यानम् 'अक्षशब्दादूहिनीशब्दे परे वृद्धिः स्यात्' इत्यर्थकवार्त्तिकेन वृद्धौ अक्षौहिणी इति । प्रादूहोढेति । प्रशब्दात् उह-ऊह-ऊढि-एष-एष्यशब्दे परे पूर्वपरयोः स्थाने वृद्धिरूपैकादेशो भवति । तथाहि प्र-ऊहः, प्र-ऊढः, प्र-ऊढिः इत्यत्र पूर्वपरयोः स्थाने आन्तरतमो वृद्धिसंज्ञकः औकारो जातस्तेन प्रौहः, प्रौढः,प्रौढिः इति । प्र-एषः, प्र-एष्यः इत्यत्र वृद्धिसंज्ञक आन्तरतम्य ऐ आदेशः । तेन प्रैषः, प्रैष्यः इति रूपम् । अत्र पूर्वोक्तरूपत्रये आद्गुणः इत्यस्य, प्र-एषः, प्र-एष्यः इत्यत्र च एङि पररूपम् इत्यस्य प्राप्तिरासीत्, तस्य बाधनाय प्रादूहोढ.. इति वार्त्तिकमिति भावः। ऋते चेति । तृतीयासमासघटकावर्णात् ऋतशब्दे परे पूर्वपरयोः स्थाने वृद्धिरित्यर्थः । सुख-ऋतः इति स्थिते अत्रावर्णात्

(सुखइत्यत्र खकारोत्तवर्ति-अवर्णात्) ऋतशब्दे परे पूर्वपरयोः अ-ऋ इत्यत्र वृद्धिसंज्ञक आकारे उरण् रपरः इत्यनेन रपरे सति प्रवृत्ते सुखार्तः इति सिद्धम्। परमर्त इति। परम-ऋतः इति स्थितेऽत्र तृतीयासमासाभावात् न वृद्धिः किन्तु आद्गुणः इति गुणे परे रपरे च रूपम्। प्रवत्सतरेति। प्र-वत्सतर-कम्बल-वसन-ऋण-दशन्-शब्दघटकाकारात् ऋणशब्दे परे पूर्वपरयोः स्थाने वृद्धिरूपैकादेशो भवतीत्यर्थः। प्र-ऋणम्, वत्सतर-ऋणम्, कम्बल-ऋणम्, वसन-ऋणम्, ऋण-ऋणम् इति स्थिते पूर्वपरयोः स्थाने आकाररूपवृद्धौ रपरे च प्रार्णम्,वत्सतरार्णम्,कम्बलार्णम्,वसनार्थणम्, ऋणार्णम् इति भवतीत्यर्थः ॥

**उपसर्गाः क्रियायोगे**

प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः। प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप - एते प्रादयः॥

**भूवादयो धातवः**

क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः॥

**उपसर्गादृति धातौ**

अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात्। प्रार्च्छति॥

प्राच्र्छति इति । प्र-ऋच्छति इति स्थितेऽत्र ऋच्छतीत्यस्य क्रियावाचकत्वात् भूवादयो धातवः इत्यनेन धातुसंज्ञायाम, प्र इत्यस्य क्रियायोगात् उपसर्गाः क्रियायोगे इत्यनेन उपसर्गसंज्ञायाम् उपसर्गादृति धातौ इत्यनेन पूर्वपरयोः स्थाने आरूपवृद्धौ रपरे च प्राच्र्छति इति सिद्ध्यति ॥

**४.शब्दावाली-**

लघुसिद्धान्तकौमुदी, गुणसन्धि:,सन्धिः, वृद्धिसंद्धिः, संयोगः, संहिता, गुणः, वृध्दि:, लोपः, इत्, पदम्।

**५. सारांशः-** १.लघुसिद्धान्तकौमुदीग्रन्थस्य परिचयः प्राप्तः।

२.लघुसिद्धान्तकौमुदीग्रन्थकर्तुः परिचय: प्राप्तः ।

३.गुणसन्धेः, वृद्धिसन्धेश्च ज्ञानमभूत्।

**६. बोधप्रश्नाः**

- लघुसिद्धान्तकौमुद्याः मङ्गलश्लोकः ?
- सूत्रेष्वदृष्टं पदं कुतः आनीयते ?
- प्रत्याहारसंज्ञाविधायकसूत्रं किम् ?
- उदात्तसंज्ञाविधायकसूत्रं किम् ?
- अनुदात्तसंज्ञाविधायकसूत्रं किम् ?

- सवर्णसंज्ञाविधायकसूत्रं किम् ?
- अकारस्य किं स्थानम् ?
- इकारस्य किं स्थानम् ?
- वकारस्य किं स्थानम् ?
- बाह्यप्रयत्नाः कतिविधाः ?
- संहितासंज्ञा केन विधीयते ?
- संयोगसंज्ञा केन विधीयते ?
- सुबन्तस्य पदसंज्ञाविधायकसूत्रं किम् ?
- तिङन्तस्य पदसंज्ञाविधायकसूत्रं किम् ?
- पदसंज्ञाविधायकसूत्रं किम् ?
- यणादेशविधायकसूत्रं किम् ?
- अयवायावसन्धिविधायकसूत्रं किम् ?
- गुणवर्णाः के ?
- गुणसंज्ञाविधायकसूत्रं किम् ?
- सुखार्तः इत्यत्र केन कः सन्धिः ?

**७. सन्दर्भग्रन्थसूची-**

लघुसिद्धान्तकौमुदी, वरदराजाचार्यः, गीताप्रेस

**८. सहायकग्रन्थसूची**

लघुसिद्धान्तकौमुदी, भैमीव्याख्यासहिता, भीमसेनशास्त्री, भैमीप्रकाशन

# द्वितीयः खण्डः

**पाठसंरचना-**

१. प्रस्तावना

२. उद्देश्यम्

३. मूलभागः

४. बोधप्रश्नाः

५. शब्दावाली

६. सारांशः

७. सन्दर्भग्रन्थसूची

८. सहायकग्रन्थसूची

**१.प्रस्तावना-**

अस्मात् खण्डात् प्राक् पूर्वस्मिन् भागे विशेषतः ग्रन्थपरिचयः, ग्रन्थकर्तुः परिचयः, गुणसन्धिः, वृद्धिसन्धिः इत्येते विषयाः निरूपिताः। अस्मिन् भागे तु विशेषतः प्रकृतिभावसन्धिः निरूप्यते।

**२.उद्देश्यम्-**

१. प्रकृतिभावसन्धेः परिचयसम्पादनम्।

२. प्रासङ्गिकानामन्येषामपि सन्धीनां परिचयसम्पादनम्।

३. पाणिनीयव्याकरणे प्रवेशः।

**३.मूलपाठः-**

**लोपः शाकल्यस्य**

अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोपो वाऽशि परे॥

लोपः शाकल्यस्येति। भोभगोअघोअपूर्वस्य योऽशि इत्यतः अपूर्वस्येति अशीति चानुवर्तते। व्योर्लघुप्रयत्नतरः शाकटायनस्य इत्यततः व्योरित्यनुवर्तते अत आह — अवर्णेति ॥

**पूर्वत्रासिद्धम्**

सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम्। हर इह, हरयिह। विष्ण इह, विष्णविह॥

पूर्वत्रासिद्धमिति । पाणिनिप्रणीया अष्टाध्यायी, तत्र अष्टमाध्याये द्वितीयपादस्येदमादिमं सूत्रम् । इतः प्राक्तनं कृत्स्नं सूत्रजालं सपादसप्ताध्यायीति व्यवह्रियते । उपरितनं तु कृत्स्नं सूत्रजालं त्रिपादीति व्यवह्रियते इति भावः । हर इह इति । हरे इह इति स्थिते एचोऽयवायावः इत्यनेन अयादेशे कृते हरय् इह इति दशायाम् लोपः शाकल्यस्य इत्यनेन अवर्णपूर्वकपदान्ते वर्तमानस्य य् इत्यस्य विकल्पेन लोपः अचि 'इ' इति परे । तेन हर इह इति जाते अत्र शङ्क्यते — लोपानन्तरम् हर इह इत्यत्र आद्गुणः इत्यनेन गुणः कथं न भवति ? उत्तरम् — पूर्वत्रासिद्धम् इत्यनेन सूत्रेण सपादसप्ताध्यायीस्थसूत्रदृष्ट्या (आद्गुणः इति सूत्रदृष्ट्या) त्रैपादिकः लोपः शाकल्यस्य इति लोपोऽसिद्धः । तत्र यलोपे जातेऽपि यकारोऽस्तीति भावनया आद्गुणः इति सूत्रार्थो न घटते इति भावः । लोपाभावपक्षे — हरयिह इति । एवमेव, विष्ण इह, विष्णविह इत्यत्रापि बोध्यम् ॥

**अकः सवर्णे दीर्घः**

अकः सवर्णेऽचि परे पूर्वपरयोर्दीर्घ एकादेशः स्यात्। दैत्यारिः। श्रीशः। विष्णूदयः। होतॄकारः॥

दैत्यारिरिति। दैत्यानामसुराणाम् अरिः शत्रुरिति विग्रहः। सिद्धिप्रकारस्तु— दैत्य-अरिः इति स्थिते अत्र अकः सवर्णे दीर्घः इत्यनेन सूत्रेणे सवर्णेऽचि (अकारे) परे पूर्वपरयोः स्थाने सवर्णदीर्घादेशे कृते सति दैत्यारिः इति भवति। श्री-ईशः अत्रापि अकः सवर्णे दीर्घः इत्यनेन पूर्वपरयोः ई-ई इति स्थाने सवर्णदीर्घादेशे श्रीशः इति भवति। एवमेव विष्णु-उदयः इति स्थिते प्रकृतसूत्रेण सवर्णदीर्घादेशे विष्णूदयः इति रूपम्॥

**अनेकाल्शित्सर्वस्य**

इति प्राप्ते॥

**ङिच्च**

ङिदनेकालप्यन्त्यस्यैव स्यात्॥

**अवङ् स्फोटायनस्य**

पदान्ते एङन्तस्य गोरवङ् वाऽचि। गवाग्रम्, गोऽग्रम्। पदान्ते किम्? गवि॥

गवाग्रमिति। गो-अग्रम्इति दशायाम् अवङ् स्फोटायनस्य इत्यनेन पदान्ते विद्यमानस्य एङन्तस्य गो इत्यस्य अवङादेशः प्राप्तः अग्रम् एतत् घटकाकारे परे। सः अवङादेशः कुत्र स्यात्? अवङि

अनेकाल्त्वात् अनेकाल्शित्सर्वस्य इत्यनेन सर्वादेशे प्राप्ते ङिच्च इत्यनेन ङिदादेशस्यानेकाल्त्वेऽपि अन्त्यादेश इति गोशब्दस्य गकारोत्तवर्ति-ओकारस्य अनुबन्धलोपपूर्वके अवङादेशे गव-अग्रम् इति जाते अकः सवर्णे दीर्घः इत्यनेन दीर्घे गवाग्रम् इत्यपि रूपम्भवति। अत्रायं विचारः — सर्वत्र विभाषा गोः इत्यनेन प्रकृतिभावो विकल्पेन भवति। तदभावे अवङादेशो विकल्पेन। तदभावे च पूर्वरूपमिति गो अग्रम्, गोऽग्रम्, गवाग्रम् इति रूपत्रयम् ॥

**इन्द्रे च**

गोरवङ् स्यादिन्द्रे। गवेन्द्रः॥

गवेन्द्र इति। गो-इन्द्रः इति स्थितेऽत्र इन्द्रे च इत्यनेन गोशब्दस्य गकारोत्तवर्त्योकारस्य अवङादेशे सवर्णदीर्घे च सति रूपम् ॥

**दूराद्धूते च**

दूरात्सम्बोधने वाक्यस्य टेः प्लुतो वा॥

**प्लुतप्रगृह्या अचि नित्यम्**

एतेऽचि प्रकृत्या स्युः। आगच्छ कृष्ण ३ अत्र गौश्चरति॥

आगच्छ कृष्णेति। आगच्छ कृष्ण ३ अत्र गौश्चरति इति वाक्ये कृष्ण-अत्र इत्यत्र दूराद्धूते च इत्यनेन सूत्रेण टिसंज्ञकस्य णकारोत्तवर्त्यकारस्य प्लुतत्वं विधाय प्लुतप्रगृह्या अचि नित्यम् इत्यनेन प्रकृतिभावे आगच्छ कृष्ण ३ अत्र गौश्चरति इति सिध्यति ॥

**ईदूदेद्विवचनं प्रगृह्यम्**

ईदूदेदन्तं द्विवचनं प्रगृह्यं स्यात्। हरी एतौ। विष्णू इमौ। गङ्गे अमू॥

हरि एतावति । हरी-एतौ इत्यत्र ईदूदेद् द्विवचनं प्रगृह्यम् इत्यनेन सूत्रेण प्रगृह्यसंज्ञायाम् प्लुतप्रगृह्या अचि नित्यम् इत्यनेन प्रकृतिभावे हरी एतौ इति निष्पन्नम् । एवमेव विष्णू-इमौ, गङ्गे-अमू इत्यत्र क्रमेण ऊकारान्तैकारान्तद्विवचनत्वात् ईदूदेद् द्विवचनं प्रगृह्यम् इत्यनेन प्रगृह्यसंज्ञायां प्रकृतिभावे च विष्णू इमौ, गङ्गे अमू इति भवति ।

**अदसो मात्**

अस्मात्परावीदूतौ प्रगृह्यौ स्तः। अमी ईशाः। रामकृष्णावमू आसाते। मात्किम्? अमुकेऽत्र॥

अदसो मादिति। अदसः इत्यवयवषष्ठी, तेन अदश्शब्दावयवमकारात्परस्येकारस्य सत्वात्प्रगृह्यसंज्ञायाम् प्लुतप्रगृह्या अचि नित्यम् इत्यनेन प्रकृतिभावे अमी ईशाः इति रूपम्। एवमेव रामकृष्णावमू-आसाते इत्यत्रापि प्रगृह्यसंज्ञां कृत्वा प्रकृतिभावो विधेयः। मात् किमिति। असति माद्ग्रहणे एकारोऽप्यनुवर्तेत। तेन च अमुकेऽत्र अत्र प्रगृह्यसंह्ञापूर्वकप्रकृतिभाव आपद्येत इति भावः॥

**चादयोऽसत्त्वे**

अद्रव्यार्थाश्चादयो निपाताः स्युः॥

अद्रव्यार्थाश्चेति । लिङ्गसङ्ख्याकारकान्वितं द्रव्यम्, तद्भिन्नमद्रव्यमित्यर्थः ॥

**प्रादयः**

एतेऽपि तथा॥

**निपात एकाजनाङ्**

एकोऽज् निपात आङ्वर्जः प्रगृह्यः स्यात्। इ इन्द्रः। उ उमेशः। वाक्यस्मरणयोरङित्; आ एवं नु मन्यसे। आ एवं किल तत्। अन्यत्र ङित् ; आ ईषदुष्णम् ओष्णम्॥

इ इन्द्र इति। इ-इन्द्र इत्यत्र इकारस्य चादयोऽसत्त्वे इत्यनेन निपातसंज्ञायाम् निपात एकाजनाङ् इत्यनेन प्रगृह्यसंज्ञायाम् प्लुतप्रगृह्या अचि नित्यम् इत्यनेन प्रकृतिभावे इ इन्द्र इति भवति। स एव प्रकारो उ उमेशः इत्यत्र विज्ञेयः। आ एवमिति । ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः। एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्॥ इति। प्रकृते आ एवं नु मन्यसे इत्यस्य वाक्यार्थत्वात्, आ एवं किल तत् इत्यस्य स्मरणार्थकत्वाच्च अङित्त्वेन निपात एकाजनाङ् इत्यनेन आ इत्यस्य प्रगृह्यत्वे प्लुतप्रगृह्या अचि नित्यम् इत्यनेन प्रकृतिभावे सति रूपम्। अन्यत्रेति। वाक्यस्मरणार्थकभिन्ने इत्यर्थः। तेन ईषदर्थक-आ-इत्यस्य ङित्त्वात् प्रगृह्यसंज्ञाभावे प्रकृतिभावाभावेन आद्गुणः इत्यनेन गुणे आ-ईषद् उष्णम्, ओष्णम् इति जायते॥

**ओत्**

ओदन्तो निपातः प्रगृह्यः स्यात्। अहो ईशाः॥

अहो ईशाः । अत्र ओत् इति सूत्रेण प्रगृह्यसंज्ञायां प्लुतप्रगृह्या अचि नित्यम् इत्यनेन प्रकृतिभावे च सति अहो ईशाः इति भवति ॥

**सम्बुद्धौ शाकल्यस्येतावनार्षे**

सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिके इतौ परे। विष्णो इति, विष्ण इति, विष्णविति॥

विष्णो इतीति। विष्णो-इति इति स्थितावत्र सम्बुद्धौ शाकल्यस्येतावनार्षे इत्यनेन सम्बुद्धिनिमित्तकस्य ओकारस्य अवैदिके इतौ परे प्रगृह्यसंज्ञायां प्लुतप्रगृह्या अचि नित्यम् इत्यनेन प्रकृतिभावे च सति विष्णो इति इति रूपं सिद्ध्यति। स च प्रकृतिभावो विकल्पेन भवति । तद्भावे एचोऽयवायावः इत्यनेन अवादेशे लोपः शाकल्यस्य इत्यनेन विकल्पेन लोपे विष्ण इति इति रूपम् । वलोपाभावे च विष्णविति इति रूपम् ॥

**मय उञो वो वा**

मयः परस्य उञो वो वाऽचि। किम्वुक्तम्, किमु उक्तम्॥

किम्वुक्तमिति । किम् उ उक्तम् इत्यवस्थायाम् मय उञो वो वा इति सूत्रेण मयः परस्य उञः ('उ' इत्यस्य) 'व्' आदेशो भवति; अचि ('उक्तम्') घटकोकारे परे, तेन किम् व् उक्तम् इति जाते 'अज्झिनं परेण संयोज्यम्', किम्वुक्तम् इति निष्पन्नम् । व् आदेशो विकल्पेन भवति, तद्भावे च निपात एकाजनाङ् इत्यनेन प्रगृह्यसंज्ञायां प्रकृतिभावे च किमु उक्तम् इति जायते ॥

**इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च**

पदान्ता इको ह्रस्वा वा स्युरसवर्णेऽचि। ह्रस्वविधिसामर्थ्यान्न स्वरसन्धिः। चक्रि अत्र, चक्र्यत्र। पदान्ता इति किम्? गौर्यौ -

चक्रि अत्रेति। चक्रि-अत्र इत्यत्र इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च इत्यनेन विकल्पेन ह्रस्वे कृते चक्रि अत्र इति भवति । तदभावे च इको यणचि इत्यनेन यणि चक्र्यत्र इति जायते॥ पदान्ता इति किमिति। पदान्ता इति यदि आचार्या न अपठिष्यन् तदा गौरी-औ इत्यत्रापि इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च इत्यनेन ह्रस्वसमुच्चितप्रकृतिभावोऽभविष्यत्, तन्निवारणाय पदान्ता इत्युक्तम्। अत्र पदान्ताभावात् न ह्रस्वत्वं, किन्तु इको यणचि इत्यनेन यणि अचो रहाभ्यां द्वे इत्यनेन विकल्पेन य-द्वित्वे गौर्य्यौ इति। पक्षे द्वित्वाभावे गौर्यौ इति।

**अचो रहाभ्यां द्वे**

अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः। गौर्य्यौ । न समासे (वार्त्तिकम्) । वाप्यश्वः ॥

वाप्यश्व इति । वाप्यामश्वः वाप्यश्वः, वापी-अश्व इति वार्तिकेन निषिध्यते । अतोऽत्र न प्रकृतिभावः, किन्तु इको यणचि इत्यनेन यणि वाप्यश्वः इति रूपम् ॥

**ऋत्यकः**

ऋति परे पदान्ता अकः प्राग्वद्वा। ब्रह्म ऋषिः, ब्रह्मर्षिः पदान्ताः किम् ? आर्च्छत् ॥

ब्रह्मा ऋषि इति। ब्रह्मा ऋषिः इति स्थितौ ऋत्यकः इत्यनेन पदान्तस्य अक्-प्रत्याहारान्तर्गतमकारोत्तवर्तिनः आकारस्य ह्रस्वत्वे कृते ब्रह्म ऋषिः इति जायते। पक्षे आद्गुणः इति पूर्वपरयोः स्थाने गुणे रपरे च कृते ब्रह्मर्षिः इति रूपंम्भवति। पदान्ता किमिति। अत्र पदान्ताः इत्यस्याग्रहणे तु आ ऋच्छत् इत्यत्र ह्रस्वत्वमापद्येत। तन्मा भूदेतदर्थं पदान्ताः इति। तेनात्र आटश्च इत्यनेन वृद्धौ सत्याम् आर्च्छत् इति सिद्ध्यतीति दिक्।

**बोधप्रश्नाः**

- टिसंज्ञाविधायकसूत्रं किम् ?
- सवर्णसंज्ञाविधायकसूत्रं किम् ?
- प्रगृह्यसंज्ञाविधायकसूत्रं किम् ?
- वाप्यश्वः इत्यत्र ह्रस्वसमुच्चितप्रकृतिभावो कुतो न ?
- ऋत्यकः इति कीदृशं सूत्रम् ?

**४.शब्दावाली-**

प्लुतः, प्रगृह्यः, प्रकृतिभावः, निपातः, संबुद्धिः, अवैदिकः, असिद्धिम्, सवर्णम् इति।

**५.सारांशः-**

१. प्रकृतिभावसन्धेः परिचयः प्राप्तः।

२. प्रासङ्गिकानामन्येषामपि सन्धीनां परिचयः प्राप्तः।

३. पाणिनीयव्याकरणे ईषद् प्रवेशः जातः।

**७.सन्दर्भग्रन्थसूची-**

लघुसिद्धान्तकौमुदी, वरदराजाचार्यः, गीताप्रेस`

**८.सहायकग्रन्थसूची**

लघुसिद्धान्तकौमुदी, भैमीव्याख्यासहिता, भीमसेनशास्त्री, भैमीप्रकाशन

# तृतीयः खण्डः

**पाठसंरचना-**

**१.प्रस्तावना**

**२.उद्देश्यम्**

**३.मूलभागः**

**४.बोधप्रश्नाः**

**५.शब्दावाली**

**६.सारांशः**

**७.सन्दर्भग्रन्थसूची**

**८.सहायकग्रन्थसूची**

**१.प्रस्तावना-**

अस्मात् खण्डात् प्राक् पूर्वस्मिन् भागे विशेषतः प्रकृतिभावसन्धेः, प्रासङ्गिकानामन्येषामपि सन्धीनां परिचयसम्पादनं कृतम्। अस्मिन् भागे तु विशेषतः हल्सन्धिः निरूप्यते।

**२.उद्देश्यम्-**

१. हल्सन्धेः परिचयसम्पादनम्।

२. प्रासङ्गिकानामन्येषामपि सन्धीनां परिचयसम्पादनम्।

३. पाणिनीयव्याकरणे प्रवेशः।

**३.मूलपाठः-**

**स्तोः श्चुना श्चुः**

सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः । रामश्शेते । रामश्चिनोति । सच्चित्। शार्ङ्गिञ्जय ॥

सकारतवर्गयोरिति । अत्र स्थान्यादेशयोर्यथासङ्ख्यम्, निमित्तकार्यिणोस्तु न । शात् इति ज्ञापकात् । रामश्शेत इति । रामश्शेते इति स्थितौ स्तोः श्चुना श्चुः इत्यनेन सूत्रेण सकारस्य शकारेण सहात्र योगे सति सकारस्य शकारादेशे रामश्शेते इति रूपम्भवति । एवम् रामस्-चिनोति इत्यत्र चयोगे सकारस्य शकारादेशे रामश्चिनोति इति जायते । सत्-चित् इत्यवस्थायां प्रकृतसूत्रेण त्-इत्यस्य स्थाने च्-इत्यादेशे सच्चित् इति रूपम् । शार्ङ्गिन् जय इत्यत्र स्तोः श्चुना श्चुः इत्यनेन न्-इत्यस्य स्थाने ञ्-इत्यादेशे शार्ङ्गिञ्जय इति रूपम् ॥

**शात्**

शात्परस्य तवर्गस्य चुत्वं न स्यात्। विश्नः। प्रश्नः॥

विश्न इति । विश्-न, प्रश्-न इत्यत्र पूर्वसूत्रेण नकारस्य श्चुत्वे प्राप्ते शात् इत्यनेन शात्परस्य तवर्गस्य न इत्यस्य श्चुत्वं निषिध्यते ॥

**ष्टुना ष्टुः**

स्तोः ष्टुना योगे ष्टुः स्यात्। रामष्षष्ठः। रामष्टीकते। पेष्टा। तट्टीका। चक्रिण्ढौकसे॥

ष्टुना ष्टुरिति। अत्र 'स्तोः' इत्यनुवर्तते। पूर्ववदत्रापि कार्यिनिमित्तयोर्यथासङ्ख्यं न भवति। तोः षिः इति ज्ञापकात्। रामस्-षष्ठः अत्र ष्टुना ष्टुः इत्यनेन सकारस्य षकारयोगेन सकारस्य षकारादेशे रामष्षष्ठः इति रूपम्। एवं रामस् टीकते इत्यत्र टकारेण योगे सकारस्य षकारादेशे रामष्टीकते इति रूपम्। पेष्-ता इत्यत्र ष्टुना ष्टुः इत्यनेन तकारस्य ष्टुत्वे पेष्टा इति जायते। तत्-टीका इति दशायां प्रकृतसूत्रेण त् इत्यस्य ट् इत्यादेशे तट्टीका इति रूपम्। चक्रिन्-ढौकसे इत्यत्र ष्टुना ष्टुः इत्यनेन न् इत्यस्य ण् इत्यादेशे चक्रिण्ढौकसे इति रूपम्भवति॥

**न पदान्ताट्टोरनाम्**

पदान्ताट्टवर्गात्परस्यानामः स्तोः ष्टुर्न स्यात्। षट् सन्तः। षट् ते। पदान्तात्किम्? ईट्टे। टोः किम्? सर्पिष्टमम्। अनाम्नवतिनगरीणामिति वाच्यम् (वार्त्तिकम्) । षण्णाम् । षण्णवतिः। षण्णगर्य्यः॥

नपदान्तादिति। षट्-सन्तः, षट्-ते इत्यत्र टवर्गस्य पदान्ते वर्तमानान्न ष्टुत्वम्। पदान्तादित्यस्यास्वीकारे ईट्-ते इत्यत्रापि निषेध आपद्येत । अतः सूत्रे तन्निवेशः आवश्यकः । टोः किमिति। ननु सर्पिष्-तमम् इत्यत्र स्वादिष्वसर्वनामस्थाने इत्यनेन पदसंज्ञायामत्र झलां जशोऽन्ते इत्यनेन जश्त्वं स्यादिति चेन्न, ह्रस्वात् तादौ तद्धिते इत्यनेन कृतस्य षत्वस्य जश्त्वदृष्ट्यासऽसिद्धत्वात्। टोर्ग्रहणाभावे षकारोऽप्यनुवर्तेत। तेन प्रकृतेऽपि निषेधः स्यात्तन्मा भूदिति टोर्ग्रहणम्। षण्णामिति। षष्-नाम इत्यवस्थायां झलां जशोऽन्ते इत्यनेन जश्त्वे षड्-नाम इति स्थितौ अनाम्नवतिनगरीणामिति

वाच्यम् इत्यनेन पर्युदासात् (निषेधस्य निषेधात्) ष्टुत्वे षड्-नाम इति जाते प्रत्यये भाषायां नित्यम् इति वार्त्तिकेन ड्-इत्यस्य नित्यानुनासिके सति, षण्णाम् इति रूपम्बोध्यम्। षण्णवतिरिति। षडधिका नवतिरिति विग्रहः । षड्-नवतिः इत्यत्र न पदान्ताट्टोरनाम् इति निषेधे प्राप्ते अनाम्नवतिनगरीणामिति वाच्यम् इत्यनेन पर्युदासात् ष्टुत्वे जाते यरोऽनुनासिकेऽनुनासिको वा इत्यनेन पूर्वस्य ड्-इत्यस्यानुनासिके षण्णवतिः इति रूपम्। एवमेव षण्णगर्यः इत्यत्रापि बोध्यम् ॥

**तोः षि**

न ष्टुत्वम्। सन्षष्ठः॥

तोः षीति । तवर्गस्य षकारे परे न ष्टुत्वम् । तेन सन्-षष्ठः इत्यत्र तवर्गान्तःपातिनो नकारस्य षकारे परे न ष्टुत्वम् ॥

**झलां जशोऽन्ते**

पदान्ते झलां जशः स्युः। वागीशः॥

वागीश इति। वाक्-ईशः अत्र झलां जशोऽन्ते इत्यनेन क्-इत्यस्य स्थाने स्थानेऽन्तरतमः इत्यनेन सूत्रेण कण्ठस्थानीयो गकारादेशो जायते; यतेन वागीशः इति रूपम्भवति ॥

**यरोऽनुनासिकेऽनुनासिको वा**

यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात् । एतन्मुरारिः एतद् मुरारिः । प्रत्यये भाषायां नित्यम् (वार्त्तिकम्) । तन्मात्रम् । चिन्मयम् ॥

यरोनुनासिक इति । न पदान्ताट्टोरनाम् इत्यतः पदान्तादित्यनुवर्तते । तच्च षष्ठ्यन्ततया विपरिणम्यते तदाह — यरः पदान्तस्येति । एतद्-मुरारिः इति स्थितौ यरोनुनासिकेऽनुनासिको वा इति सूत्रेण समेष्वनुनासिकेषु प्राप्तेषु सत्सु स्थानेऽन्तरतमः इत्यनेन दस्य दन्त्यत्वात् दन्त्येषु चानुनासिकान्तःपातिनः नस्यैव विद्यमानत्त्वान्नकारे विकल्पेन जाते एतन्मुरारिः इति सिद्धम् । पक्षे — एतद्मुरारिः इति । एष चासौ मुरारिः इति कर्मधारयसमासोऽत्र बोध्यः । प्रत्यये भाषायामिति। प्रत्यये अनुनासिकात्मके परे लोके नित्यमनुनासिकः स्यादित्यर्थः। तन्मात्रमिति । तत्प्रमाणमस्येति तन्मात्रम्; प्रमाणे द्वयसज्दघ्नञ्मात्रचः इत्यनेन मात्रच्प्रत्ययः। तद्-मात्रम् इत्यवस्थायाम् प्रत्यये भाषायां नित्यम् इत्यनेन स्थानत आन्तर्यमाश्रित्य दकारस्य स्थाने नकारे जाते तन्मात्रम् इति निष्पन्नम्। चिन्मयमिति। चिदेव चिन्मात्रम्, अत्र नित्यं वृद्धशरादिभ्यः इत्यत्र नित्यमिति योगविभागात्ताद्रूप्ये मयट्। प्रक्रिया तु पूर्ववद्बोध्या ॥

### तोर्लि

तवर्गस्य लकारे परे परसवर्णः। तल्लयः। विद्वाँल्लिखति। नस्यानुनासिको लः॥

तोर्लीति । अनुस्वारस्य ययि परसवर्णः इत्यतः परसवर्ण इत्यनुवर्तते तदाह — परसवर्ण इति। तद्-लयः इत्यत्र तोर्लि इत्यनेन तवर्गान्तःपातिनो दस्य स्थाने परसवर्णः (परनिमित्तभूतलकारसवर्णः) ल एव जातः। तेन तल्लयः इति सिद्धम्। तस्य लयः तल्लय इति विग्रहोऽत्र बोध्यः । विद्वाँल्लिखतीति । विद्वान्-लिखति इति स्थिते नकारस्य स्थानिनोऽनुनासिकस्य परसवर्णो लकारो भवन् आन्तर्यादनुनासिक एव लकारो जातस्तेन विद्वाँल्लिखति इति सिद्धम् ॥

**उदः स्थास्तम्भोः पूर्वस्य**

उदः परयोः स्थास्तम्भोः पूर्वसवर्णः ॥

उदः स्थास्तस्म्भोरिति। एकदेशे स्वरितत्वप्रतिज्ञानात् अनुस्वारस्य ययि परसवर्णः इत्यत्रस्थं समासनिर्दिष्टमपि सवर्णग्रहणमिह निकृष्य सम्बध्यते। उद उति पञ्चमी। अतः तस्मादित्युत्तरस्य इति परिभाषया उदः परयोः इति लभ्यते। तदाह — उदः परयोरिति। उद्-स्थानम्, उद्-स्तम्भनम् इति स्थिते। अत्र उदः परयोः स्था इत्यस्य स्तम्भ इत्यस्य च पूर्वसवर्णः - दकारसवर्णः प्राप्तः। तत्र आदेः परस्य इति परिभाषया स्थास्तम्भोराद्यवयवस्य सकारस्यैव भवति। तत्र पूर्वदकारसवर्णाश्च — तथदधनाः पञ्चैव। दन्तस्थानसाम्यात्, स्पृष्टप्रयत्नसाम्याच्च। न तु लकारः सकारश्च । तयोः स्थानसान्येऽपि विवृतप्रयत्नत्वात्। नापि लकारः ईषत्स्पृष्टत्वात्। एतददतिरिक्ताश्च सर्वे वर्णाः भिन्नस्थानिकत्वान्न दकारसवर्णाः । एवञ्च पूर्वनिमित्रभूतदकारसवर्णाः तथदधनाः पञ्चापि सकारस्य प्राप्ताः। तत्र सकारस्य

विवारश्वासाघोषमहाप्राणवतः सादृश्यात् तत्स्थाने तादृक् विवारश्वासाघोषमहाप्राणवान् थ् एव लभ्यते । तेन सस्य थकारादेशे उद् थ् थानम्, उद् थ् तम्भनम् इति जाते झरो झरि सवर्णे इत्यनेन दकारोत्तवर्तिनः थकारस्य विकल्पेन लोपे खरि च इत्यनेन दकारस्य चर्त्वे उत्थानम्, उत्तम्भनम् इति भवतः। पक्षे उत्थ्थानम्, उत्थ्तम्भनम् इत्येव, न तु थकारस्य चर्त्वम्। चर्त्वं प्रति थकारस्यासिद्धत्वात् ॥

**तस्मादित्युत्तरस्य**

पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम्॥

**आदेः परस्य**

परस्य यद्विहितं तत्तस्यादेर्बोध्यम्। इति सस्य थः॥

**झरो झरि सवर्णे**

हलः परस्य झरो वा लोपः सवर्णे झरि॥

**खरि च**

खरि झलां चरः स्युः । इत्युदो दस्य तः। उत्थानम्। उत्तम्भनम्॥

**शश्छोऽटि**

झयः परस्य शस्य छो वाऽटि। तद् शिव इत्यत्र दस्य श्चुत्वेन जकारे कृते खरि चेति जकारस्य चकारः। तच्छिवः, तच्शिवः। छत्वममीति वाच्यम् (वार्त्तिकम्) । तच्छ्लोकेन॥

शश्छोटीति । झयो होऽन्यतरस्याम् इत्यतः झयः इति पञ्चम्यन्तमनुवर्तते । शः इति षष्ठ्येकवचनम् । तदाह झयः परस्येत्यादीना । तद्-शिवः इति स्थितेऽत्र दकारस्य स्तोः श्चुना श्चुः इत्यनेन सूत्रेण श्चुत्वे - जकारे कृते, तस्य जकारस्य खरि च इत्यनेन चकारे कृते तच्-शिवः इति जाते, तदनन्तरम् शश्छोटि इत्यनेन झयन्तःपातिनश्चकारात्परस्य शस्य अङ्वत्याहारान्तःपातिनि शकारोत्तरवर्तिनीकारे परे छत्वे च विहिते तच्छिवः इति निष्पन्नम् । छत्वाभावे तच् शिवः इति भवति। छत्वममीति । शश्छोऽटि इति सूत्रे अटीति विहाय अमीति वक्तव्यमित्यर्थः । शश्छोऽमि इति सूत्रं पठनीयमिति यावत् । तच्छ्लोकेनेति । तद्-श्लोकेन इत्यत्र स्तोः श्चुना श्चुः इत्यनेन दकारस्य जकारे कृते खरि च इत्यनेन चकारे तच्-श्लोकेन इत्यवस्थायां छत्वममीति वाच्यम् इति वार्त्तिकेन शस्य छत्वे च कृते तच्छ्लोकेन इति सिध्यति । पक्षे तच्श्लोकेन इति ।

**मोऽनुस्वारः**

मान्तस्य पदस्यानुस्वारो हलि । हरिं वन्दे ॥

मोऽनुस्वार इति । पदस्य इत्यधिकारात् पदस्य इत्यनुवर्तते । म इति षष्ठ्यन्तम् । पदस्य विशेषणं तदन्तविधिः । हलि सर्वेषाम् इत्यतः हलीत्यनुवर्तते । तदेतदाह — मान्तस्येत्यादिना। हरिं वन्दे इत्यत्र

मान्तं पदं हरिम् इति, तस्यानुस्वारो मोऽनुस्वारः इत्येनन प्राप्तः, अलोऽन्त्यस्य इति परिभाषया अन्त्यस्य म् इत्यस्य स्थाने जातः । तेन हरिं वन्दे इति जायते ।

**नश्चापदान्तस्य झलि**

नस्य मस्य चापदान्तस्य झल्यनुस्वारः। यशांसि। आक्रंस्यते। झलि किम्? मन्यते॥

नश्चापदान्तस्येति । चकारान्मस्येत्यनुकृष्यते अनुस्वार इति च। यशांसीति । यशान्-सि इत्यत्र नश्चापदान्तस्य झलि इत्यनेन पदान्तरहितस्य नकारस्य झल्प्रत्याहारान्तःपातिनि सकारे परे नस्यानुस्वारे कृते यशांसि इति। आक्रम् स्यते इत्यवस्थायां मकारस्य अपदान्तत्वात् नश्चापदान्तस्य झलि इत्यनेनैव खरि परे सत्यनुस्वारे विहिते आक्रंस्यते इति जायते॥

**अनुस्वारस्य ययि परसवर्णः**

स्पष्टम्। शान्तः॥

स्पष्टमिति । अनुवर्त्यपदान्तराभावादिति भावः । अनुस्वारस्य परसवर्णः भवति ययि परे इत्यर्थः ॥ शान्त इति । शाम्-त इति स्थिते अत्र नश्चापदान्तस्य झलि इत्यनेन म् इत्यस्यानुस्वारे कृते शां-तः इति जाते अनुस्वारस्य ययि परसवर्णः इत्यनेन परसवर्णे नकारे विहिते शान्तः इति सिद्धम्। एवमेव अङ्कितः, अञ्चितः, कुण्ठितः, गुम्फितः इत्यत्रापि बोध्यम् ॥

**वा पदान्तस्य**

त्वङ्करोषि, त्वं करोषि॥

वा पदान्तस्येति । अनुस्वारस्य ययि परसवर्णः इति सम्पूर्णं सूत्रमनुवर्तते । त्वम्-करोषि इति स्थिते मोऽनुस्वारः इत्यनेन पदान्तस्य मस्यानुस्वारे विहिते सति तस्य स्थाने वा पदान्तस्य इत्यनेन विकल्पेन परस्य ककारस्य सवर्णे क् ख् ग् घ् ङ् इति सर्वस्मिन् प्राप्ते स्थानेऽन्तरतमः इत्यनेन अनुस्वारस्य नासिकास्थानत्वात् तत्स्थानतुल्यो ङकारो जातः । तेन त्वङ्करोषि इति भवति । पक्षे अनस्वारात्मकम् त्वं करोषि इति रूपम् ॥

**मो राजि समः क्वौ**

क्विबन्ते राजतौ परे समो मस्य म एव स्यात्। सम्राट्॥

मो राजीति । म इति प्रथमान्तम् । मोऽनुस्वारः इत्यतो म इति स्थानषष्ठ्यन्तमनुवर्तते । समः इत्यवयवषष्ठी । प्रत्ययग्रहणपरिभाषया क्विग्रहणेन क्विप्रत्ययान्तलाभः । तदाह — क्विब्ते इत्यादिना । सम्-राड् इति स्थितेऽत्र मोऽनुस्वारः इत्यनेन मकारस्य स्थाने अनुस्वारे प्राप्ते तं बाधित्वा मो राजि समः क्वौ इत्यनेन मकारस्य स्थाने म एव विधीयते । तेन सम्राट् इति भवति । मकारस्य स्थाने मकारविधानमनुस्वारनिवृत्त्यर्थमिति भावः ॥

**हे मपरे वा**

मपरे हकारे परे मस्य मो वा। किम् ह्मलयति, किं ह्मलयति। यवलपरे यवला वा (वार्त्तिकम्)। कियँ् ह्यः, किं ह्यः। किवँ् ह्वलयति, किं ह्वलयति। किलँ् ह्लादयति, किं ह्लादयति॥

हे मपर इति। मोऽनुस्वारः इत्यतः म इति षष्ठ्यन्तमनुवर्तते । मो राजि समः क्वौ इत्यतः म इति प्रथमान्तमनुवर्तते। मः परो यस्मादिति विग्रहस्तदाह— मपरे इत्यादिना । किम्-ह्मलयति इत्यत्र मोऽनुस्वारः इत्यनेनानुस्वारे प्राप्ते तं प्रबाध्य हे मपरे वा इत्यनेन मस्य मत्वे कृते किम् ह्मलयति इति भवति । पक्षे मोऽनुस्वारः इत्यनेनानुस्वारे किंह्मलयति इति भवति। यवलपरे इति। यवलाः परे यस्मादिति विग्रहः। यवलपरके हकारे परे मस्य क्रमेण यवला एव वा स्युरित्यर्थः। कियँ् ह्य इति किम्-ह्यः इत्यत्र यवलपरे यवला वा इत्यनेन वार्त्तिकेन यपरके हकारे परे मोऽनुस्वारः इति प्राप्तमनुस्वारं बाधित्वा मकारस्यानुनासिके यकारे विकल्पेन विहिते कियँ् ह्यः इति भवति। पक्षे अनुस्वारे किंह्यः इति। एवमेव - किम् ह्वलयति, किम् ह्लादयति इत्यत्र वपरके वँ् इति, लपरके लँ् इति चानुनासिके कृते किवँ्ह्वलयति, किलँ्ह्लादयति च जायेते ॥

**नपरे नः**

नपरे हकारे मस्य नो वा। किन् ह्नुते, किं ह्नुते॥ नपरे न इति । हे इति वेति म इति चानुवर्तते। नः परो यस्मादिति विग्रहस्तदाह — नपरे हकार इत्यादिना। किन्ह्नुते इति। किम्-ह्नुते इत्यत्र नपरे नः इत्यनेन सूत्रेण नपरे हकारे परे मस्य नत्वे कृते किन्ह्नुते इति रूपम्। पक्षे मस्यानुस्वार किंह्नुते इति ॥

**आद्यन्तौ टकितौ**

टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः॥

**ङ्णोः कुक्टुक् शरि**

वा स्तः। चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् (वार्त्तिकम्) । प्राङ्ख् षष्ठः, प्राङ्क्षष्ठः, प्राङ् षष्ठः। सुगण्ठ् षष्ठः सुगण्ट् षष्ठः, सुगण् षष्ठः॥

ङ्णोः कुगिति। हे मपरे वा इत्यतः वेत्यनुवर्तते। कुक् च टुक् चेति समाहारद्वन्द्वः। ङकारणकारयोः कुक्टुकावागमौ वा स्तः शरि इत्यर्थः। उभयत्र ककार इत्संज्ञकः। उकार उच्चारणार्थः। प्राङ्-षष्ठः इति स्थिते, अत्र ङ्णोः कुक् टुक् शरि इत्यनेन ङकारस्य कुगागमे आद्यन्तौ टकितौ इत्यनेन ङकारस्यान्ते जाते प्राङ् कुक् षष्ठः इति निष्पन्ने सति क् इत्यस्य हलन्त्यम् इत्यनेनेत्संज्ञायां तस्य लोपः इत्यनेन लोपे चे प्राङ्क् षष्ठः इति जाते, तत्र विकल्पेन चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् इति वार्त्तिकेन खत्वे विहिते प्राङ्षष्ठः इत्यभवत्। द्वितीयाक्षराभावे क्-ष्-संयोगे प्राङ्क्षष्ठः इति भवति। कुगागमाभावे प्राङ्षष्ठः इति। एवम् सुगण् षष्ठः इति दशायां ङ्णोः कुक् टुक् शरि इत्यनेन णकारस्य टुगागमे, आद्यन्तौ टकितौ इत्यनेन अन्तावयवे जाते सुगण्-टुक् षष्ठः इति जाते, उकारे निवृत्ते ककारस्येत्संज्ञायां लोपे च सुगण् ट् षष्ठः इति। तत्र चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् इत्यनेन

द्वितीयाक्षरे ठकारे विकल्पेन जाते सुगण्ठ्षष्ठः इत्यभवत्। द्वितीयाक्षराभावे सुगण्ट्षष्ठः इति भवति। टुगागमाभावे सुगण् षष्ठः इति रूपम्बोध्यम् ॥

**डः सि धुट्**

डात्परस्य सस्य धुड्वा। षट्त्सन्तः, षट् सन्तः॥

डः सीति । डः इति पञ्चमी । सि इति सप्तमी । अत्र तस्मादित्युत्तरस्य इति, तस्मिन्निति निर्दिष्टे पूर्वस्य इति च परिभाषयोः प्राप्तयोः उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् इति न्यायेन तस्मादित्युत्तरस्य इति परिभाषया सीति सप्तमी षष्ठी सम्पद्यते — डात्परस्य सस्येति । षड्-सन्तः इत्यत्र डः सि धुट् इत्यनेन डात् परस्य धुड्प्राप्तिः; सः क्व स्यादित्याशङ्कायामाह — आद्यन्तौ टकितौ इति टित्वात्सस्यादौ धुटि जाते षड् धुट् सन्तः इति जातम् । अत्र टस्य हलन्त्यम् इत्यनेनेत्संज्ञायां धकारोत्तरवर्तिन उकारस्य च उपदेशेऽजनुनासिक इत् इत्यनेनेत्संज्ञायां तस्य लोपः इत्यनेन लोपे च कृते षड् ध् सन्तः इति भूतम् । अत्र खरि च इत्यनेन धस्य तकारे, डकारस्य टकारे च कृते षट्त्सन्तः इति जातम् । धुडभावपक्षे खरि च इति डस्य चर्त्वे टत्वे कृते षट्सन्तः इति जायते । अत्र ष्टुना ष्टुः इत्यनेन ष्टुत्वं न शङ्क्यम्, न पदान्ताट्टोरनाम् इति निषेधात् ॥

**नश्च**

नान्तात्परस्य सस्य धुड्वा। सन्त्सः, सन्सः॥

नश्चेति । सि धुट् इति, वेति चानुवर्तते । न इति पञ्चमी, तस्मादित्युत्तरस्य इति परिभाषया सीति षष्ठी सम्पद्यते तदाह — नान्तात्परस्येत्यादिना । सन्त्स इति । सन् सः इत्यवस्थायाम् नश्च इति सूत्रेण धुटि विहिते क्व भवति इति शङ्कायाम् आद्यन्तौ टकितौ इत्यनेन सस्याद्यावयवे सन् धुट् स इति जाते तत्र उकारस्य निवृत्तिः । टकारस्य हलन्त्यम् इत्यनेनेत्संज्ञायाम् तस्य लोपः इत्यनेन लोपे च सन् ध् स इति जाते तत्र खरि च इत्यनेन धकारस्य चर्त्वेन तकारे कृते सति सन्त्सः इति जायते । धुडागमाभावे सन्सः इति भवति॥

**शि तुक्**

पदान्तस्य नस्य शे परे तुग्वा। सञ्छम्भुः, सञ्च्छम्भुः, सञ्शम्भुः, सञ्शम्भुः॥

शि तुगिति । पूर्वसूत्रात् न इति पञ्चम्यन्तमनुवृत्तमिह षष्ठ्यन्तमाश्रीयते; शब्दाधिकाराश्रयणात् । पदस्य इत्यधिकृतम् अवयवषष्ठ्यन्तमाश्रीयते । हे मपरे वा इत्यतो वेत्यनुवर्तते तदाह — पदान्तस्य नस्येत्यादिना । सन्-शम्भुः इत्यत्र कस्य सूत्रस्य प्राप्तिः ? शि तुक् इत्यस्य, तेन पदान्तस्य तुकि कृते आद्यन्तौ टकितौ इत्यनेन नस्यान्तावयवे कृते सन् तुक् शम्भुः इति जाते अत्र हलन्त्यम् इत्यनेन कस्येत्संज्ञायाम् तस्य लोपः इत्यनेन लोपे उकारनिवृत्तौ सत्याम् सन् त् शम्भुः इति जाते, शश्छोऽटि इत्यनेन शम्भुरित्यस्य शस्य छत्वे कृते सन् त् छम्भुः इति जाते, स्तोः श्चुना श्चुः इति तस्य चर्त्वे, पुनः स्तोः श्चुना श्चुः इति नस्य ञत्वे च विहिते सञ्च्छम्भुः इति जायते । यत्र झरो झरि सवर्णे इति वैकल्पिकचलोपः, तत्र सञ्छम्भुः इति। चलोपाभावे च सञ्च्छम्भुः इति । शश्छोऽटि इति छत्वाभावे स्तोः श्चुना श्चुः इति तस्य चत्वे पुनः स्तोः श्चुना श्चुः इत्यनेन नस्य ञत्वे च विहिते सञ्शम्भुः इति, तुकश्चाभावे

तस्य श्रुत्वे च कृते सञ्शम्भुः इति रूपचतुष्टयमत्र बोध्यम् । तथाहि सङ्ग्रहः — 'ञछौ ञचछा ञचशा ञशाविति चतुष्टयम् । रूपाणामिह तुक्छत्वचलोपानां विकल्पनात् ॥' इति ॥

**ङमो ह्रस्वादचि ङमुण्नित्यम्**

ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो ङमुट्। प्रत्यङ्ङात्मा। सुगण्णीशः। सन्नच्युतः॥

ङमो ह्रस्वादिति । ङम् इति प्रत्याहारः । ङमः इति पञ्चम्यन्तम् । तद्विशेषणत्वात्पदस्येत्यधिकृतं पञ्चम्यन्ततया विपरिणम्यते । ङम इति च ह्रस्वादिति विशेषणसम्बन्धमनुभूय पदविशेषणत्वं भवत् तदन्तपरम् । ङम इति पञ्चमीबलात् अचीति सप्तमी षष्ठ्यर्थे । तदाह — ह्रस्वात्पर इत्यादिना । ङमुडागम इति । टकार इत्, उकार उच्चारणार्थः । संज्ञायां कृतं टित्त्वमानर्थक्यात्तदङ्गन्यायात् संज्ञिभिः सम्बध्यते । ततश्च ङुट् णुट् नुट् इति त्रय आगमाः फलिताः इति भावः । प्रत्यङ्ङात्मेति । प्रत्यङ्-आत्मा इत्यत्र ङमो ह्रस्वादचि ङमुण् नित्यम् इत्यनेन ह्रस्वात्परस्य ङम्प्रत्याहारान्तःपातिनो ङकारात्परस्याच्प्रत्याहारान्तवर्तिन आकारस्य टित्वादादौ ङमुटि जाते प्रत्यङ् ङुट् आत्मा इति जातम्, उकारस्योच्चारणार्थत्त्वान्निवृत्तौ टकारस्येत्संज्ञायां लोपे च प्रत्यङ् ङ् आत्मा इति तत्र सर्वस्मिन् संयुक्ते प्रत्यङ्ङात्मा इति रूपम्भवति । एवं सुगण्-ईशः इत्यत्र ङमो ह्रस्वादचि ङमुण् नित्यम् इत्यनेन ई इत्यस्य णुडागमे उकारस्यानुबन्धस्य च निवृत्तौ संयोगे च सति सुगण्णीशः इति भवति । एवमेव सन्-अच्युतः इति दशायां ङमो ह्रस्वादचि ङमुण् नित्यम् इत्यनेन पूर्ववत् नुटि सन्नच्युतः इति सिध्यति ॥

**समः सुटि**

समो रुः सुटि॥

समः सुटीति । सम इति षष्ठ्यन्तम् । मतुवसो रु सम्बुद्धौ छन्दसि इत्यतो रुग्रहणमनुवर्तते, तदाह — समो रुः स्यात् सुटी इति । सँस्कर्तेति । सम्-कर्ता इत्यत्र सम्परिभ्यां करोतौ भूषणे इति सूत्रेण सुडागमेऽनुबन्धलोपे सति सम् स कर्ता इति जाते अत्र समः सुटि इति सुट्सम्बन्धिनि सकारे परे सर्वस्य समो रुत्वे प्राप्ते अलोऽन्त्यस्य इति योगेनान्त्यस्य मस्य रुत्वे उकारकलोपे च विहिते स र् स् कर्ता इति भूते अत्रानुनासिक पूर्वस्य तु वा इत्यनेन रोः पूर्वमनुनासिके जाते सँर् स् कर्ता इति जाते, यस्मिन् पक्षे वाग्रहणादनुनासिको नाभूत् तस्मिन् पक्षे अनुनासिकात्परोऽनुस्वारः इति योगेनानुस्वारे कृते संर् स् कर्ता इति जाते अत्र खरवसानयोर्विसर्जनीयः इत्यनेन खर्-प्रत्याहारान्तःपातिनि सकारे परे रेफस्य विसर्गे विहिते सः कर्ता, संः कर्ता इति जाते अत्र विसर्जनीयस्य सः इति विसर्जनीयस्य सत्वे प्राप्ते वा शरि इति विसर्जनीयस्य विसर्जनीयत्वे च लब्धे इहोभयमपि प्रबाध्य सम्पुङ्कानां सो वक्तव्यः इति वार्त्तिकेन विसर्गस्य सत्वे कृते सँस्कर्ता इति, संस्कर्ता इति च रूपद्वयं सिध्यति ॥

**अत्रानुनासिकः पूर्वस्य तु वा**

अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा॥

**अनुनासिकात् परोऽनुस्वारः**

अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः॥

**खरवसानयोर्विसर्जनीयः**

खरि अवसाने च पदान्तस्य रेफस्य विसर्गः। संपुंकानां सो वक्तव्यः (वार्त्तिकम्) । सँस्स्कर्ता, संस्स्कर्ता॥

**पुमः खय्यम्परे**

अम्परे खयि पुमो रुः। पुँस्कोकिलः, पुंस्कोकिलः॥

पुमः खय्यम्पर इति। मतुवसो रु सम्बुद्धौ छन्दसि इत्यतो रुग्रहणमनुवर्तते अम् परो यस्मादिति विग्रहस्तदाह— अम्परे खवि इति। पुंस्कोकिल इति। पुमांश्चासौ कोकिलश्चेति कर्मधारयसमासः। पुम्-कोकिलः इत्यत्र पुमः खय्यम्परे इत्यनेन पुमो मस्य रुत्वे रेफोत्तरवर्त्युकारलोपे पुर् कोकिल इति जाते अत्रानुनासिकः पूर्वस्य तु वा इत्यनुनासिके पुँर्-कोकिलः, पक्षे अनुनासिकात्परोऽनुस्वारः इत्यनेनानुस्वारे पुंर् कोकिल इति भूते अत्र खरवसानयोर्विसर्जनीयः इति रेफस्य विसर्गत्वे कुप्वोः ≍क ≍पौ च इत्यनेन जिह्वामूलीये प्राप्ते तं बाधित्वा सम्पुङ्कानां सो वक्तव्यः इति विसर्गस्य सत्वे कृते पुँस्कोकिलः, पुंस्कोकिलः इति रूपद्वयं सिद्ध्यति ॥

**नश्छव्यप्रशान्**

अम्परे छवि नान्तस्य पदस्य रुः ; न तु प्रशान्शब्दस्य॥

नश्छव्यप्रशानिति । न इति षष्ठ्यन्तं पदस्येत्यधिकृत्य विशेषणम् । तदन्तविधिः । अम्परे इति रुँ इति चानुवर्तते, तदाह — अम्पर इत्यादिना । चक्रिंस्त्रायस्वेति । चक्रिन्-त्रायस्व इति स्थिते नश्छव्यप्रशान् इत्यनेन नान्तस्य पदस्य चक्रिन् इत्यस्य रुँत्वे प्राप्ते अलोऽन्त्यस्य इत्यनेन न् इत्यस्य स्थाने रुँ कृते अम्परकछव्प्रत्याहारान्तःपातिनि ककारे परे चक्रिरुँ त्रायस्व इति जाते रेफोत्तरवर्त्युकारस्येत्संज्ञायां लोपे च चक्रिर् त्रायस्व इति जाते अत्रानुनासिकः पूर्वस्य तु वा इति अनुनासिके, पक्षे अनुनासिकात्परोऽनुस्वारः इत्यनुस्वारे च चक्रिँर् त्रायस्व, चक्रिंर् त्रायस्व इति जाते खरवसानयोर्विसर्जनीय इति उभयत्र रेफस्य विसर्गे कृते सति विसर्जनीयस्य स इत्यनेन विसर्गस्य सत्वे चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व इति रूपद्वयं बोध्यम् ॥ अप्रशान् किमिति । प्रशान् तनोति इत्यत्र सूत्रार्थसमन्वयात् नकारस्य रुत्वं प्राप्तम्, तन्नेष्टमिति शास्त्रे अप्रशान् इति पर्युदस्यते ॥

**विसर्जनीयस्य सः**

खरि। चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व । अप्रशान् किम् ? प्रशान् तनोति । पदस्येति किम् ? हन्ति॥

**नॄन् पे**

नॄनित्यस्य रुर्वा पे॥

नॄन् पे इति। नॄन् इति द्वितीयान्तशब्दस्वरूपपरम्बोध्यम्। तच्च षष्ठ्यन्तम्। षष्ठ्याः सौत्रो लुक्। नलोपाभावोऽपि सौत्र एव। मतुवसो रु सम्बुद्धौ छन्दसि इत्यतो रुँ इत्यनुवर्तते। उभयथर्क्षु इत्यत

उभयथेत्यनुवर्तते। कदाचिद्भवति, कदाचिन्न भवतीत्येवमुभयथा रुः प्रत्येतव्य इत्यर्थः। विकल्प इति यावत्। तदाह — नॄनित्यस्येत्यादिना।

**कुप्वोः ≍क≍पौ च**

कवर्गे पवर्गे च विसर्गस्य ≍क ≍पौ स्तः, चाद्विसर्गः । नॄँ ≍पाहि, नॄँः पाहि, नॄं≍ पाहि नॄंः पाहि । नॄन्पाहि॥

नॄँ≍पाहीति । नॄन् पाहि इत्यत्र नॄन् पे इत्यनेन नस्य रुत्वे उकारलोपे अत्रानुनासिकः पूर्वस्य तु वा इत्यनुनासिके, पक्षे अनुनासिकात्परोऽनुस्वारः इत्यनुस्वारे खरवसानयोर्विसर्जनीयः इति विसर्गे, कुप्वोः ≍क ≍पौ च इत्युपध्मानीये च नॄँ≍पाहि, नॄंपाहि इति । उपध्मानीयाभावे सति विसर्गे नॄँः पाहि, नॄंः पाहि इति । पक्षे — नॄन्पाहि इति पञ्च रूपाणि । सूत्रे पे इत्यत्राकार उच्चारणार्थः । तेन नॄन् पुनाति इत्यादावपि पञ्च रूपाणि बोध्यानि ॥

**तस्य परमाम्रेडितम्**

द्विरुक्तस्य परमाम्रेडितम् स्यात् ॥

**कानाम्रेडिते**

कान्नकारस्य रुः स्यादाम्रेडिते। काँस्कान्, कांस्कान्॥

कानाम्रेडित इति। कानिति द्वितीयान्तं शब्दस्वरूपपरं षष्ठ्यन्तम्। षष्ठ्याश्च सौत्रो लुक्। नलोपाभावोऽपि सौत्र एव। अलोऽन्त्यस्य इति परिभाषया कान्शब्दान्तस्येति लभ्यते। रुँ इत्यनुवर्तते। तदाह— कान्नकारस्येत्यादिना। कान् इत्यस्य वीप्सास्यां द्विर्वचने कान् कान् इति स्थिते प्रथमनकारस्य कानाम्रेडिते इत्यनेन रुत्वे उकारलोपे अत्रानुनासिकः पूर्वस्य तु वा इत्यनुनासिके काँर् कान् इति जाते पक्षे अनुनासिकात्परोऽनुस्वारः इत्यनुस्वारे कांर् कान् इति भूते अत्र खरवसानयोर्विसर्जनीयः इति रेफस्य विसर्गे कुप्वोः ≍क ≍पौ च इत्यनेन जिह्वामूलीये च प्राप्ते तं प्रबाध्य सम्पुंकानां सो वक्तव्यः इति वार्त्तिकेन सत्वे च कृते काँस्कान्, कांस्कान् इति ॥

**छे च**

ह्रस्वस्य छे तुक्। शिवच्छाया॥

छे चेति । ह्रस्वस्य पिति कृति तुक् इत्यतो ह्रस्वस्येति तुगिति चानुवर्तते। संहितायामित्यधिकृतम्। तदाह - ह्रस्वस्येत्यादिना । शिवच्छायेति । शिव-छाया इत्यवस्थायां छे च इति सूत्रेण ह्रस्वस्य — शिव इत्यत्रस्थवकारोत्तरवर्त्यकारस्य तुक् प्राप्तः छे परे सति। स च कित्त्वाद् आद्यन्तौ टकितौ इत्यनेन अन्तावयवो जातः। तत्र हलन्त्यम् इत्यनेन ककारस्येत्संज्ञायाम् तस्य लोपः इत्यनेन लोपे उकारस्य निवृत्तौ शिव त् छाया इति जाते, इह स्तोः श्चुना श्चुः इत्यनेन तकारस्य चत्वे विहिते शिवच्छाया इति सिद्धम् । एवमेव स्वच्छाया इत्यत्र बोध्यम् ॥

**पदान्ताद्वा**

दीर्घात्पदान्ताच्छे तुग् वा । लक्ष्मीच्छाया, लक्ष्मीछाया ॥ विसर्जनीयस्य सः खरि । विष्णुस्त्राता॥

पदान्ताद्वेति। तुक्, छे, दीर्घात् इत्यनुवर्तते। तदाह — दीर्घात्पदान्तादित्यादिना । अत्र दीर्घस्यैवायं तुक् बोध्यः। न च उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् इति परिभाषया छकारस्यान्तावयवस्तुक् स्यादिति वाच्यम्, विभाषा सेनासुराच्छायाशालानिशानाम् इति पाणिनीयसूत्रेण तस्याः प्रबाधनात्। लक्ष्मीच्छायेति । लक्ष्मी छाया इत्यवस्थायाम् पदान्ताद्वा इत्यनेन तुकि उको लोपे स्तोः श्चुना श्चुः इत्यनेन तस्य चत्वे लक्ष्मीच्छाया इति निष्पन्नम्। तुगभावे च लक्ष्मीछाया इति॥ इति हल्सन्धिप्रकरणम्॥ विष्णुस्त्रातेति। विष्णुः त्राता इति स्थिते विसर्जनीयस्य सः इति सूत्रेण खर्-प्रत्याहारान्तःपातिनि तकारे परे विसर्गस्य सत्वे कृते विष्णुस्त्राता इति रूपम् ॥

**बोधप्रश्नाः**

- स्तो श्चुना श्चुः इति सूत्रार्थः कः ?
- तोर्लि इति सूत्रार्थः कः ?

**शब्दावली-**

ह्रस्वः,तुक्,आम्रेडितम्,पदान्तम्,विसर्जनीयः,विभाषा,अनुनासिकः, अनुस्वारः इति|

**सारांशः-**

१. हल्सन्धेः परिचयसम्पादनमभूत्|

२. प्रासङ्गिकानामन्येषामपि सन्धीनां परिचयसम्पादनमभूत्।

३. पाणिनीयव्याकरणे ईषद् प्रवेशः जातः।

**७.सन्दर्भग्रन्थसूची-**

लघुसिद्धान्तकौमुदी, वरदराजाचार्यः, गीताप्रेस

**८.सहायकग्रन्थसूची**

लघुसिद्धान्तकौमुदी, भैमीव्याख्यासहिता, भीमसेनशास्त्री, भैमीप्रकाशन

# चतुर्थः खण्डः

**पाठसंरचना-**

१.प्रस्तावना

२.उद्देश्यम्

३.मूलभागः

४.बोधप्रश्नाः

५.शब्दावाली

६.सारांशः

७.सन्दर्भग्रन्थसूची

८.सहायकग्रन्थसूची

**१.प्रस्तावना-**

अस्मात् खण्डात् प्राक् पूर्वस्मिन् भागे विशेषत: हल्सन्धेः, प्रासङ्गिकानामन्येषामपि सन्धीनां परिचयसम्पादनं कृतम्। अस्मिन् भागे तु विशेषतः विषर्गसन्धि: निरूप्यते।

**२.उद्देश्यम्-**

१. विषर्गसन्धेः परिचयसम्पादनम्।

२. प्रासङ्गिकानामन्येषामपि सन्धीनां परिचयसम्पादनम्।

३. पाणिनीयव्याकरणे प्रवेशः।

३.मूलपाठः-

**वा शरि**

शरि विसर्गस्य विसर्गो वा। हरिः शेते, हरिश्शेते॥

वा शरीति । विसर्जनीयस्येति, विसर्जनीय इति चानुवर्तते । विसर्गस्य विसर्गविधानञ्च तस्य सत्वपरिसंख्यानार्थम्। वाग्रहणाच्च सत्वपरिसंख्यानं पाक्षिकम् । तदाह — शरि परे इत्यादिना । हरिः शेते इति । हरिः शेते इत्यत्र वा शरि इति सूत्रेण शर्-प्रत्याहारान्तःपातिनि शकारे परे सति विसर्गस्य विसर्गे विहिते हरिःशेते इति रूपम् । पक्षे विसर्जनीयस्य सः इत्यनेन विसर्गस्य सत्वे विहिते हरिस् शेते इति जाते, तत्र स्तोः श्चुना श्चुः इत्यनेन सकारस्य शकारे च कृते हरिश्शेते इति रूपम् ॥

**ससजुषो रुः**

पदान्तस्य सस्य सजुषश्च रुः स्यात्॥

ससजुष इति। पदस्येत्यधिकृत्य सकारेण सजुष्-शब्देन च विशेष्यते । अतस्तदन्तविधिः। सकारान्तं सजुष्-शब्दान्तं च यत्पदं तस्य रुः स्यादिति। स च अलोऽन्त्यस्य इति परिभाषया अन्त्यस्य भवति। ततश्च फलितमाह - पदान्तस्य सस्येत्यादिना ॥

**अतो रोरप्लुतादप्लुते**

अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति। शिवोऽर्च्यः॥

अतो रोरिति। ऋत उत् इत्यतः उदित्यनुवर्तते। अतः इति पञ्चमी। एङः पदान्तादति इत्यतोऽतीत्यनुवर्तते तदाह- अप्लुतादित्यादिना। शिवोऽर्च्य इति। शिवस् अर्च्यः इत्यवस्थायां ससजुषो रुः इति सस्य रुत्वे अतो रोरप्लुतादप्लुते इति सूत्रेण पूर्वपरयोः स्थाने गुणे विहिते शिवो अर्च्यः इति जाते, एङः पदान्तादति इति सूत्रेणार्च्य इत्यस्याकारस्य पूर्वरूपादेशे च विहिते शिवोर्च्यः इति सिद्धम् ॥

**हशि च**

तथा। शिवो वन्द्यः॥

हशि चेति । अतो रोरप्लुतादिति पदत्रयं पूर्वसूत्रादनुवर्तते । ऋत उत् इत्यतः उदिति च, तेन अप्लुतादतः परस्य रोरुः स्याद्धशि इति सूत्रार्थः। शिवो वन्द्यः इति। शिवस्-वन्द्यः इत्यत्र ससजुषो रुः इत्यनेन सस्य रुत्वे हशि च इत्यनेन हश्-प्रत्याहारान्तःपातिनि वन्द्यघटकवकारे परे रोरुत्वे आद्गुणः इत्यनेन पूर्वपरयोः स्थाने गुणे च कृते शिवो वन्द्यः इति रूपम् ।

**भोभगोअघोअपूर्वस्य योऽशि**

एतत्पूर्वस्य रोर्यादेशोऽशि। देवा इह, देवायिह। भोस् भगोस् अघोस् इति सान्ता निपाताः। तेषां रोर्यत्वे कृते॥

भो भगो इति। रोः सुपि इत्यतो रोरित्यनुवर्तते। भो भगो अघो अ इत्येतेषां द्वन्दः। एते पूर्वे यस्मादिति बहुव्रीहिः। पूर्वशब्दश्च प्रत्येकं सम्बध्यते। द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते इति नियमात्। तेन भोपूर्वकस्य, भगोपूर्वकस्य, अघोपूर्वकस्य, अवर्णपूर्वकस्य च रोर्यादेशः स्यादशि इति सूत्रार्थः। देवा इहेति । देवास् इह इति दशायां ससजुषो रुः इति सूत्रेण सस्य रुत्वे भोभगोअघोअपूर्वस्य योऽशि इति सूत्रेण रोर्यादेशे देवाय् इह इति जाते तत्र लोपः शाकल्यस्य इत्यनेन यलोपे देवा इह इति जायते। शाकल्यग्रहणात्पक्षे देवायिह इति ॥

**हलि सर्वेषाम्**

भोभगोअघोअपूर्वस्य यस्य लोपः स्याद्धलि। भो देवाः। भगो नमस्ते। अघो याहि॥

भोस् देवाः इत्यत्र ससजुषो रुः इति सस्य रुत्वे भोभगोअघोअपूर्वस्य योऽशि इत्यनेन रोर्यत्वे हलि सर्वेषाम् इति यलोपे च भो देवा इति रूपम् । भगोस् नमस्ते इति दशायां ससजुषो रुः इति सस्य रुत्वे भोभगोअघोअपूर्वस्य योऽशि इति रोर्यत्वे हलि सर्वेषाम् इति यलोपे च भगो नमस्ते इति जायते। अघोस् याहि इत्यत्र ससजुषो रुः इति सस्य रुत्वे भोभगोअघोअपूर्वस्य योऽशि इति रोर्यादेशे हलि सर्वेषाम् इति यलोपे च कृते अघो याहि इति रूपं सिद्धम् ॥

**रोऽसुपि**

अह्नो रेफादेशो न तु सुपि। अहरहः। अहर्गणः॥

रोऽसुपीति । रः असुपीतिच्छेदः। अहन् इति सूत्रमनुवर्तते । तच्च लुप्तषष्ठीकं पदम् । तदाह- अह्नो रेफादेश इत्यादिना। अहरह इति। नित्यवीप्सयोः इति द्विर्वचनम् । अहन् अहन् इति स्थिते रोऽसुपि इत्यनेन सर्वस्याहन् शब्दस्य रेफादेशे प्राप्ते अलोऽन्त्यस्य इति परिभाषया उभयत्रान्त्यस्य नस्य जाते, अहर् अहर् इति जाते तत्र खरवसानयोर्विसर्जनीयः इत्यन्तस्य विसर्गे, कृते च संयोगे अहरहः इति भवति। अहन् गणः अत्र रोऽसुपि इति सर्वस्य रेफादेशे प्राप्ते अलोऽन्त्यस्य इति परिभाषया अन्त्यस्य विहिते सयुक्ते च कृते अहर्गणः इति रूपम् ॥

**रो रि**

रेफस्य रेफे परे लोपः ॥

रो रीति । रः इति षष्ठी । ढो ढे लोपः इत्यतो लोप इत्यनुवर्तते, तदाह — रेफस्येति ॥

**ढ्रलोपे पूर्वस्य दीर्घोऽणः**

ढरेफयोर्लोपनिमित्तयोः पूर्वस्याणो दीर्घः। पुना रमते। हरी रम्यः। शम्भू राजते। अणः किम्? तृढः। वृढः। मनस् रथ इत्यत्र रुत्वे कृते हशि चेत्युत्वे रोरीति लोपे च प्राप्ते -

ढ्रलोप इति। ढ् च रेफश्च ढ्रौ तौ लोपयतीति ढ्रलोपः। ण्यन्तात्कर्मण्युपपदे अण्, उपपदसमासः। ढलोपनिमित्तकं रेफलोपनिमित्तञ्च विवक्षितम्। तच्च ढकाररेफात्मकमेव । ढो ढे लोपः, रो रि इति तयोरेव

ढ्लोपनिमित्तत्वात्। तथा च ढलोपनिमित्ते ढकारे रेफलोपनिमित्ते रेफे च परतः पूर्वस्याणो दीर्घः इति फलति तदाह— ढरेफयोरित्यादिना। पुना रमते इति । पुनर् रमते इति स्थिते रो रि इत्यनेन रेफस्य लोपे पुन रमते इति जाते, अत्र ढ्लोपे पूर्वस्य दीर्घोऽणः इति सूत्रेणात्र लोपनिमित्ते रेफे परे पूर्वाण्-रूपस्य नकारोत्तवर्तिनोऽकारस्य दीर्घे च विहिते पुना रमते इति सिद्धम्। हरिस् रम्यः इत्यत्र ससजुषो रुः इत्यनेन सस्य रुत्वे, अनुबन्धलोपे हरिर् रम्यः इति जाते; तत्र रो रि इत्यनेन रेफस्य लोपे ढ्लोपे पूर्वस्य दीर्घोऽणः इत्यनेन दीर्घे च कृते हरी रम्यः इति सिद्धम्। शम्भूस् राजते अत्र ससजुषो रुः इत्यनेन रुत्वे उकारस्येत्संज्ञायां लोपे च शम्भुर् राजते इति जाते तत्र रो रि इत्यनेन रेफस्य लोपे ढ्लोपे पूर्वस्य दीर्घोऽणः इत्येननोकारस्य दीर्घे शम्भू राजते इति भवति। तृहूँ हिंसायाम्, वृहूँ उद्यमने आभ्यां क्तप्रत्यये हो ढः इति ढत्वे, झषस्तथोर्धोऽधः इति तकारस्य धत्वे तस्य ष्टुत्वेन ढकारे तृढ् ढ,, वृढ् ढ इति जाते अत्र ढो ढे लोपः इत्यनेन पूर्वढस्य लोपे सति ढ्लोपे पूर्वस्य दीर्घोऽणः इत्यस्मिन् सूत्रे अण्-ग्रहणाभावे ढलोपनिमित्ते ढकारे परे पूर्वस्य ऋकारस्य दीर्घे प्राप्ते तन्मा भूत् इति अण्-ग्रहणमत्र कृतम् । तेनात्र न दीर्घस्तदेवाह — अणः किम्? तृढः वृढः इति ॥

**विप्रतिषेधे परं कार्यम्**

तुल्यबलविरोधे परं कार्यं स्यात्। इति लोपे प्राप्ते। पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वमेव। मनोरथः॥

विप्रतिषेध इति। विप्रतिपूर्वात् सेधतेर्घञि उपसर्गवशात् परस्मपरविरोधे विप्रतिषेधशब्दः। विरोधश्च तुल्यबलयोरेव लोकसिद्धस्तदाह तुल्यबलेति। द्वयोः शास्त्रयोः क्वचिल्लब्धावकाशयोरेकत्र लक्ष्ये युगपत्सम्भवस्तुल्यबलविरोधः। कार्यस्य परत्वं परशास्त्रविहितत्वम्। मनोरथ इति। मनस् रथः इति स्थिते ससजुषो रुः इति पदान्तस्य सस्य रुत्वे हशि च इति रोरुत्वे प्राप्ते रो रि इति रेफस्य लोपे च प्राप्ते, तर्हि प्राक् केन भाव्यमिति शङ्कायाम् विप्रतिषेधे परं कार्यम् इति सूत्रेण परं कर्तव्यम्। तत्र हशि च इति सूत्रं षष्ठाध्यायस्थम्, रो रि इति चाष्टमाध्यायस्थम् इति हशि च इत्यपेक्षया रो रि इत्यस्य परत्वम्, इति रो रि इत्यनेन रेफस्य लोपे प्राप्ते; तत्र पूर्वत्रासिद्धम् इत्यधिकारसूत्रेण सपादसप्ताध्यायीसूत्रदृष्ट्या त्रैपादिकस्य रो रि इत्यस्यासिद्धत्वप्रतिपादनात् न रो रि इत्यनेन रेफस्य लोपः, किन्तु हशि च इत्यनेन रोरुत्वे मन उ रथः इति जाते, तत्र आद्गुणः इत्यनेन पूर्वपरयोः स्थाने ओकाररूपे गुणे कृते मनोरथः इति सिद्ध्यति ॥

**एतत्तदोः सुलोपोऽकोरनञ्समासे हलि**

अककारयोरेतत्तदोर्यः सुस्तस्य लोपो हलि न तु नञ्समासे। एष विष्णुः। स शम्भुः। अकोः किम्? एषको रुद्रः। अनञ्समासे किम्? असः शिवः। हलि किम्? एषोऽत्र॥

एतत्तदोरिति । एतत्तच्छब्दयोरनुकरणेन शब्दपरत्वम् । अतः सूत्रे नैकशेषः । सु इति लुप्तषष्ठीकं पदम् एतत्तदोरित्यनेनान्वेति — एतत्तदोः सकारस्येति । अत एव सोर्लोपः सुलोपः इति न षष्ठीसमासः, असामर्थ्यात्। अविद्यमानः ककारः ययोस्तौ अकौ, यतोः अकोरिति बहुव्रीहिस्तदाह

- अककारयोरित्यादिना। एष विष्णुरिति। एतद्-सु विष्णुः इति दशायां त्यदादीनामः इत्यनेन अकारादेशे अतो गुणे इति पररूपे तदोः सः सावनन्त्ययोः इत्यनेन तस्य सत्वे, सस्य च षत्वे एष सु विष्णुः इति जाते अत्र एतत्तदोः सुलोपोऽकोरनञ्समासे हलि इति सूत्रेण सोर्लोपे विहिते सति एष विष्णुः इति सम्पद्यते। स शम्भुरिति । तद्-सुँ शम्भुः इत्यत्र त्यदादीनामः इत्यनेनाकारान्तादेशे अतो गुणे इत्यनेन पररूपत्वे तदोः सः सावनन्त्ययोः इति तस्य सत्वे स सुँ शम्भुः इति जाते; अत्र एतत्तदोः सुलोपोऽकोरनञ्समासे हलि इति सोर्लोपे च कृते स शम्भुः इति रूपम् । अको किमिति । न च अकचि सति शब्दान्तरत्वात् प्रकृते प्राप्तिरेव नास्तीति वाच्यम्; तन्मध्यपतितस्तद्ग्रहणेन गृह्यते इति परिभाषयात्र प्राप्तेः सत्वात् प्रकृतपरिभाषायामिदमेव ज्ञापकं बोध्यम् । एषकस् रुद्रः अत्र एतच्छब्दस्य सककारत्वान्न सुँलोपः, किन्तु ससजुषो रुः इत्यनेन रुत्वे, हशि च इत्युत्वे आद्गुणः इति गुणे एषको रुद्रः इति रूपम्। अत्र सको रुद्रः इत्यपि प्रत्युदाहरणम्बोध्यम्। अनञ्समासे किमिति । अनञ्समासे इति न पर्युदासः किन्तु प्रसज्यप्रतिषेधः। प्रकृते अस सुँ शिवः इत्यत्र नञ्-समासत्वात् एतत्तदोः सुलोपोऽकोरनञ्समासे हलि इति सूत्रस्याप्राप्तौ ससजुषो रुः इति सस्य रुत्वे खरवसानयोर्विसर्जनीयः इतो रेफस्य विसर्गत्वे असः शिवः इति भवति। एषोऽत्रेति। एष सु अत्र इत्यत्र हल्परत्वाभावात् एतत्तदोः सुलोपोऽकोरनञ्समासे हलि इत्यस्याप्राप्तौ सस्य ससजुषो रुः इत्यनेन रुँत्वे अतो रोरप्लुतादप्लुते इत्यनेन उत्वे आद्गुणः इत्यनेन गुणे एङः पदान्तादति इत्यनेन पूर्वरूपे च कृते एषोऽत्र इति जायते ॥

**सोऽचि लोपे चेत् पादपूरणम्**

स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्य्येत। सेमामविड्ढि प्रभृतिम् । सैष दाशरथी रामः ॥

सोऽचि लोप इति । स इति प्रथमैकवचनान्तं स्वरूपपरम् । ततः षष्ठ्या लुक् सस् शब्दस्येति लभ्यते। सुलोप इत्यनुवर्तते; तदाह —स इत्यस्येत्यादिना । सस् इमामविड्ढिप्रभृतिम् इत्यत्र सोऽचि लोपे चेत्पादपूरणम् इति सकारलोपाभावे पादोऽत्र न पूर्यते अतोऽनेन सकारलोपे आद्गुणः इत्यनेन गुणे सति सेमानविड्ढिप्रभृतिम् इति सिद्धम् । एवम् —सस् एष दाशरथी रामः इत्यत्र सोऽचि लोपे चेत्पादपूरणम् इत्यनेन पादपूरणार्थं सलोपे विहिते वृद्धिरेचि इत्यने वृद्धौ सैष दाशरथी रामः इति पादपूरणसिद्धिः ।

**बोधप्रश्नाः-**

- विप्रतिषेधे परं कार्यम् इति सूत्रार्थः कः ?
- तुल्यबलविरोधो नाम कः ?
- शि तुक् इति सूत्रार्थः कः ?
- ङमुडागमविधायकसूत्रं किम् ?

**शब्दावली-**

- तुल्यबलविरोधो, परम्, वा, ङमुट्, विधायकम्, विसर्जनीयः, पादः, दीर्घः इति।

**सारांशः-**

१. विसर्गसन्धेः परिचयसम्पादनमभूत्।

२. प्रासङ्गिकानामन्येषामपि सन्धीनां परिचयसम्पादनमभूत्।

३. पाणिनीयव्याकरणे ईषद् प्रवेशः जातः।

**७.सन्दर्भग्रन्थसूची-**

लघुसिद्धान्तकौमुदी, वरदराजाचार्यः, गीताप्रेस

**८.सहायकग्रन्थसूची**

लघुसिद्धान्तकौमुदी, भैमीव्याख्यासहिता, भीमसेनशास्त्री, भैमीप्रकाशन

# पञ्चमः खण्डः

**पाठसंरचना-**

**१.प्रस्तावना**

**२.उद्देश्यम्**

**३.मूलभागः**

**४.बोधप्रश्नाः**

**५.शब्दावाली**

**६.सारांशः**

**७.सन्दर्भग्रन्थसूची**

**८.सहायकग्रन्थसूची**

**१.प्रस्तावना-**

अस्मात् खण्डात् प्राक् पूर्वस्मिन् भागे विशेषतः विसर्गसन्धेः, प्रासङ्गिकानामन्येषामपि सन्धीनां परिचयसम्पादनं कृतम्। अस्मिन् भागे तु विशेषतः पूर्वरूपसन्धिः पररूपसन्धिश्च निरूप्येते।

**२.उद्देश्यम्-**

१. पूर्वरूपसन्धेः परिचयसम्पादनम्।

२. पररूपसन्धेः परिचयसम्पादनम्।

२. प्रासङ्गिकानामन्येषामपि सन्धीनां परिचयसम्पादनम्।

३. पाणिनीयव्याकरणे प्रवेशः।

## ३.मूलपाठः-

**एङि पररूपम्**

आदुपसर्गादेङादौ धातौ पररूपमेकादेशः स्यात् । प्रेजते । उपोषति ॥

प्रेजत इति । प्र-एजते इति स्थिते अत्र वृद्धिरादैच् इत्यनेन वृद्धौ प्राप्तायां तां प्रबाध्य एङि पररूपम् इत्यनेन पूर्वपरयोः स्थाने पररूपैकादेशे ए इत्याजारे कृते प्रेजते इति रूपम् । एवम् उप-ओषति इत्यत्रापि पूर्वपरयोः स्थाने पररूपे सति उपोषति इति सिद्धम्भवति ॥

**अचोऽन्त्यादि टि**

अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात्। शकन्ध्वादिषु पररूपं वाच्यम् । तच्च टेः। शकन्धुः। कर्कन्धुः मनीषा। आकृतिगणोऽयम्। मार्त्तण्डः॥

शकन्धुरिति । शक-अन्धु इति स्थिते अत्र अकः सवर्णे दीर्घः इत्यनेन दीर्घे प्राप्ते तं बाधित्वा शकन्ध्वादिषु पररूपं वाच्यम् इत्यनेन पररूपे प्राप्ते तच्च पररूपं टेः भवति । टिसंज्ञा च अचोऽन्त्यादि टि इत्यनेन ककारोत्तवर्ति-अकारस्य भवति। एवञ्च शक-अन्धुः इत्यत्र पूर्वपरयोः स्थाने पररूपे सति शकन्धुः इति भवतीति भावः। एवमेव कर्क-अन्धुः इत्यत्र अचोऽन्त्यादि टि-इत्यनेन टिसंज्ञायाम् शकन्ध्वादिषु पररूपं वाच्यम् इत्यनेन पररूपे कर्कन्धुः इति भवति । मनस्-ईषा इति

स्थितेऽत्र अचोऽन्त्यादि टि इत्यनेन सूत्रेण अस्-इत्यस्य टिसंज्ञायाम् पररूपे चे मनीषा इति सिद्ध्यति। मार्त-अण्डः इति स्थिते प्रकृतवार्त्तिकेन पररूपे मार्तण्डः इति जायते ॥

**ओमाङोश्च**

ओमि आङि चात्परे पररूपमेकादेशः स्यात् । शिवायों नमः । शिव एहि ॥

शिवायों नम इति । शिवाय-ओं नमः अत्र ओमाङोश्च इत्यनेन अवर्णात् ओमि परे पूर्वपरयोः स्थाने पररूपे शिवायों नमः इति भवति ॥

**अन्तादिवच्च**

योऽयमेकादेशः स पूर्वस्यान्तवत्परस्यादिवत्। शिवेहि॥

शिवेहि इति । शिव-आ-इहि इति स्थिते अत्र धातूपसर्गयोः कार्यमन्तरङ्गम् इति परिभाषया पूर्वम् आ-इहि इत्यत्र आद्गुणः इत्यनेन गुणे एहि इति जाते तत्र अन्तादिवच्च इत्यनेन सूत्रेण अन्तवद्भावमादाय ओमाङोश्च इत्यनेन पररूपे कृते सति शिवेहि इति रूपसिद्धिर्बोध्या ॥

**झयो होऽन्यतरस्याम्**

झयः परस्य हस्य वा पूर्वसवर्णः। नादस्य घोषस्य संवारस्य महाप्राणस्य तादृशो वर्गचतुर्थः। वाग्घरिः, वाग्हरिः॥

झयो ह इति झयः इति पञ्चमी । परस्येत्यध्याहार्यम् । ह इति षष्ठी । उदः स्थास्तम्भोः पूर्वस्य इत्यतः पूर्वस्येति, अनुस्वारस्य ययि परसवर्णः इत्यतः सवर्ण इति चानुवर्तते, तदेवाह- झय परस्येत्यादिना । वाग्घरिरिति । वाक्-हरिः इति स्थिते, अत्र झलां जशोऽन्ते इत्यनेन जश्त्वे गकारे कृते झय्-प्रत्याहारान्तःपातिनो गकारात् परस्य हकारस्य पूर्वसवर्णः — गकारसवर्णाः क्, ख्, ग्, घ्, ङ् इति प्राप्ताः । तत्र हकारेण संवारनादघोषमहाप्राणवता तुल्यः संवारनादघोषमहाप्राणवान् घकारः विकल्पेन हकारस्य स्थाने जातः । तेन वाग्घरिः इति रूपं जायते । पक्षे वाग्हरिः इति भवति ।

**एङः पदान्तादति**

पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्। हरेऽव। विष्णोऽव॥

हरेऽवेति । हरे-अव इति स्थिते, अत्र एङः पदान्तादति को वात्र पदान्ते एङ् ? रेफान्तःपात्येकारः पदान्ते एङ्, ततः परः को वा अकरः ? अवेत्यस्याकारः, अत्र पूर्वपरयोः स्थाने पूर्वरूपादेशः प्राप्तः । को वा पूर्वः ? एकारः, तस्मिन् जाते सति हरेऽव इति रूपम्भवति । एवमेव, विष्णो-अव इति स्थिते अत्र एङः पदान्तादति इत्यनेन सूत्रेण पूर्वपरयोः स्थाने पूर्वरूपैकादेशे सति विष्णोऽव इति रूपम् ॥

**सर्वत्र विभाषा गोः**

लोके वेदे चैङन्तस्य गोरति वा प्रकृतिभावः पदान्ते। गोअग्रम्, गोऽग्रम्। एङन्तस्य किम्? चित्रग्वग्रम्। पदान्ते किम्? गोः॥

गो अग्रमिति। गो-अग्रम् इति स्थिते अत्र सर्वत्र विभाषा गोः इत्यनेन पदान्ते विद्यमानस्य एङन्तस्य गोशब्दस्य अति परे विकल्पेन प्रकृतिभावे सति गोअग्रम् इति रूपम् । विभाषाग्रहणात्पक्षे एङः पदान्तादति इत्यनेन पूर्वरूपैकादेशे कृते गोऽग्रम् इति रूपम्। चित्रग्वग्रमिति । चित्रगु-अग्रम् इति दशायां तत्र एङन्तत्वाभावात् न पूर्वरूपम्। नापि प्रकृतिभावः। किन्तु इको यणचि इत्यनेन यणि रूपम्। पदान्ते किमिति। गोशब्दात् ङसि प्रत्यये कृते ङकारेकारयोर्लोपे गो-अस् इति दशायां पदान्तत्वाभावात् न प्रकृतिभाव इति भावः। सूत्रे पदान्तत्वानाश्रयणे तु प्रकृते प्रकृतिभाव आपद्येतेति भावः। प्रकृते गो-अस् इत्यत्र ङसिङसोश्च इत्यनेन पूर्वरूपादेशे सति गोः इति रूपम् ॥

**शब्दावली-**

- एङ्, अत्, , झय्, अन्यतरस्याम्, पूर्वरूपम्, पररूपम्,उपसर्गः, टि इति।

**सारांशः-**

१. पूर्वरूपसन्धेः परिचयसम्पादनमभूत्।

२. पररूपसन्धेः परिचयसम्पादनमभूत्।

३. प्रासङ्गिकानामन्येषामपि सन्धीनां परिचयसम्पादनमभूत्।

४. पाणिनीयव्याकरणे ईषद् प्रवेशः जातः।

**७.सन्दर्भग्रन्थसूची-**

लघुसिद्धान्तकौमुदी, वरदराजाचार्यः, गीताप्रेस

**८.सहायकग्रन्थसूची**

लघुसिद्धान्तकौमुदी, भैमीव्याख्यासहिता, भीमसेनशास्त्री, भैमीप्रकाशन

***************